ह॥ भ्रमणमिति॥ सामान्यं निरूपयति॥ सामान्यमिति॥ तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वं॥ अनेकसम
वेतत्वं संयोगादीनामप्यस्ति अतो नित्यत्वे सतीति॥ नित्यत्वे सत्यसमवेतत्वं गगनपरिमाणादीनामप्यस्ति अत उ
क्तं अनेकेति॥ नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावस्याप्यस्ति अतः वृत्तिसामान्यं विहाय समवेतेत्युक्तं॥ एकव्य
तावच्छेदकत्वाभावात् न द्रव्याधिच कार्यनिरूपितसमवायिकारणतावच्छेदकं द्रव्यत्वं न संभवति अत विभागस्येत्यु
क्तं

परस्परात्यंताभावसमानाधिकरणयोधर्मयोः एकत्रसमावेशः संकरः॥ शरीरत्वं न जातिः कुतः पृथिवीत्वादिना संकर्यात्॥ पृथिवीत्वात्यंताभावसमाना
नाधिकरणशरीरत्वं जलीयशरीरे॥ शरीरत्वात्यंताभावसमानाधिकरणपृथिवीत्वं घटे॥

इतिसु क्तिमात्रं न जातिः॥ नव्योक्तं॥ अनेके रभेदस्तुल्यत्वं संकरोथानवस्थितिः॥ रूपहानिरसंबंधो जातिबाधकसंग्रहः॥ द्रव्यादीति परत्वं आधिकदेशवर्तित्वं अपरत्वम् अल्पदेशवर्तित्वं॥ सकलजात्यपेक्षया व्यापकत्वादधिकदेशवर्तित्वात् सत्तायाः परत्वं॥ [illegible] तनद्बोधनार्थं द्रव्यादित्रिकं वर्तिरिति सूक्तं॥ तदपेक्षयान्यासां जातीनामपरत्वं॥ व्यापकत्वादिति॥ पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवर्तित्वात् परत्वं॥ सत्तापेक्षया व्याप्यत्वादल्पदेशवर्तित्वात् द्रव्यत्वादेरपरत्वं॥ विशेषं निरूपयति॥ अंत्यो नित्य इति॥ अंते अवसाने वर्तते इति अंत्यः॥ तदपेक्षया विशेषाणां स्थितिः॥ घटादीनां द्व्यणुकपर्यंतानां तत्तदवयवभेदात् परस्परं भेदः॥ परमाणूनां परस्परभेदको विशेषस्तु॥ स तु स्वत एव व्यावृत्तः॥ तेन तत्र विशेषांतरापेक्षा नास्तीति भावः॥ समवायं दर्शयति घटादीनामिति अवयवावयविनोर्जातिव्यक्त्योः गुणगुणिनोः क्रियाक्रियावतोः नित्यद्रव्यविशेषयोश्च यः संबंधः स समवायः समवायत्वं नित्यसंबंधत्वं तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिः॥ विशेषणविशेष्यसंबंधविषया विशिष्टबुद्धिरित्यादंडी
बो पुरुष इति विशिष्टबुद्धिवदित्यनुमानेन संयोगादिबाधात् समवायसंबंधसिद्धिः॥ न च स्वरूपसंबंध [illegible] सिद्धसाधनमर्थांतरं वा॥ अनंतस्वरूपाणां संबंधत्वकल्पने गौरवात्॥ लाघवादेकसमवायसिद्धिः॥ न च समवायस्यैकत्वे वायोरूप

॥तर्कसं० टी०
२

यतो बुद्धेरप्रसंगः॥ न च रूपसमवायत्वेऽपि रूपाभावात्॥ न चैवमभावस्यापि वैशिष्ट्यसंबंधांतरं स्यादिति वाच्यं
तस्य नित्यत्वे भूतलेऽघटानयनानंतरमपि घटाभावप्रसंगात्॥ घटाभावस्य तत्र सत्त्वात्॥ तस्य च नित्यत्वात्॥ अन्यथा
देशांतरेऽपि घटाभावप्रतीतिर्न स्यात्॥ वैशिष्ट्यस्य तत्र सत्त्वात्॥ मम तु घटे पाकरक्तता[illegible]दशायां श्यामरूपस्य
नष्टत्वान्न तद्वत्ताबुद्धिः॥ वैशिष्ट्यस्यानित्यत्वे चानंतवैशिष्ट्यकल्पनागौरवं॥ इष्टं च तत्तत्कालीनतत्तद्भूत
लादिकं तत्तदभावादीनां संबंधः॥ अभावं विभजते॥ अभावस्त्विति॥ अभावत्वं द्रव्यादिषट्कान्योन्याभाव[illegible]वत्वं॥
भावा६ संसर्गेति॥ संसर्गा[illegible]न्योन्याभावे[illegible] द्विसुर्धः॥ अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावः[illegible]॥ संसर्गाभा
वं विभजते॥ प्रागभाव इति॥ संसर्गाभावत्वं अन्योन्याभावभिन्नाभावत्वं॥ अन्योन्याभावत्वं तादात्म्यसंबंधावच्छि
न्नप्रतियोगिताकाभावत्वं विनाश्यभावत्वं प्रागभावत्वं॥ जन्याभावत्वं ध्वंसत्वं॥ नित्यसंसर्गाभावत्वमत्यंताभावत्वं॥ यत्र
तु भूतलादौ घटादिकमपसार्य पुनरानीतं च तत्र घटकालस्य संबंधाघटकत्वादत्यंताभावस्य नित्यत्वेऽपि घटकाले
न घटात्यंताभावबुद्धिः॥ तत्रोत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित्॥ अत्रैव प्रागभावाधिकरणे नाशेनाभाव ध्वंस
इति प्राच्यमतं॥॥ इदानीं घटे रक्तो नास्ति रक्तश्यामो नास्तीति धीः प्रागभावध्वंसयोरवगाहते॥ ननु तदत्यंताभा

भेद॥६

त्मक वं तयोर्विरोधात्॥ नव्यास्तु तत्राविरोधे मानाभावात्॥ ध्वंसादिकालावच्छेदेनासंताभावो वर्तते इत्याहुः॥ नन्वस्तु अ
भावानामधिकरणात्मकत्वं॥ लाघवादिति चेन्न॥ अनंताधिकरणात्मकत्वकल्पनापेक्षया अतिरिक्तकल्पनाया एव लघीय
स्त्वात्॥ एवं चाधाराधेयभावोप्युपपद्यते॥ एवं च तद्घटगंधरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते॥ अन्यथा तत्तदधिकरणा
नां तत्तदिंद्रियाग्राह्यत्वात् प्रत्यक्षत्वं न स्यात्॥ तेन ज्ञानविशेषकाले विशेषात्मकत्वमभावस्येति प्रत्युक्तं॥ अप्रत्यक्षत्वाप
वत्तु त्तेः॥ इदानीं पदार्थानां साधर्म्यवैधर्म्य[illegible]मुपक्रमते॥ सप्तानामित्यादिना॥ समानो धर्मो येषां ते सधर्माणः॥ तेषां भावः सा
धर्म्यं॥ समानधर्म[illegible] इति फलितोर्थः॥ विरुद्धो धर्मो येषां ते विधर्माणः तेषां भावः वैधर्म्यं॥ विरुद्धधर्म इति फलितोर्थः॥ ज्ञे
यत्वं ज्ञानविषयता सा च सर्वत्रैवास्ति॥ ईश्वरादिज्ञानविषयतायाः [illegible]केवलान्वयित्वात्॥ एवमभिधेयत्व प्रमेयत्वादिकं बो
ध्यं॥ द्रव्येति॥ द्रव्यगुणकर्म[illegible]सामान्यविशेषाणां साधर्म्यमनेकत्वं भावत्वं समवायित्वं॥ यद्यप्यनेकत्वमभावेप्य[illegible]त स्ति
थाप्यनेकत्वे सति भावत्वं पंचानां साधर्म्यं॥ तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं फलितोर्थः॥ ते
य नमस्त्येकं घटादीनामव्याप्तिः॥ समवायित्वं समवा[illegible]संबंधेन संबंधित्वं॥ ननु समवायवत्वं॥ सामान्यादेरभावा
त्॥ समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोर्थः॥ तेन नित्यद्रव्येषु समवेतत्वाभावान्नाव्याप्तिः॥

मेवं परमाणोर्नारंभकं नाम द्व्यणुकं नित्यपरिमाणा ...
गुणा॰ रममहत्परिमाणादिगां विषयनिधया ज्ञानं प्रतिकारणत्वात्॥ इति चेन्न॥ योग्यम्प्रसंगे विषयस्य न कारणत्वं ... स्यापि कारणत्वं न भवतीत्यर्थः ...
माणं कस्याकारणं न भवतीत्युक्तं॥ अतींद्रियसामान्यं कस्याकारणं न भवतीत्यत्र किंतु न त्रसरेणौ न संनिकृष्टपरमाणु॥ अतींद्रि

सत्तावत्त्वं इति॥ द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः॥ गुणादिरिति॥ यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावति
व्याप्तं॥ क्रियाशून्यत्वं च गगनादावतिव्याप्तं॥ तथापि गुणवद्वृत्ति धर्मवत्त्वं कर्मवद्वृत्ति पदार्थविभाजकोपाधि
मत्त्वं च तदर्थः॥ न हि परत्वादिकं द्रव्यत्वं वा गुणवद्वृत्ति कर्मवद्वृत्ति वा किंतु गुणत्वादिकं तथा आकाशत्वादिकं न प
दार्थविभाजकोपाधिः॥ सामान्येति॥ सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः॥ परिमाण्डल्येति॥ पारिमाण्ड
ल्यं अणुपरिमाणं कारणत्वं न। भिन्नानामित्यर्थः अणुपरिमाणं तु न कस्यापि कारणं॥ ना द्व्यणुकस्याश्रयारब्धद्रव्यप
रिमाणारंभकं भवेत्॥ तच्च न संभवति॥ परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात्॥ महद्
त्व रब्धस्य महत्तरस्य वा द्व्यणुजन्यस्याणुतरत्वप्रसंगात्॥ एवं परममहत्परिमाणमतींद्रियसामान्यं विशेषाश्च बोध्याः॥ द्
सन्नो॥ आत्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात् परिमाणं आकाशादेर्बोध्यं॥ तस्यापि न कारणत्वमित्या
चार्याणां मात्रायः सूक्ष्मत्वे॥ ननु ज्ञानातिरिक्तं कस्य कारणतायां आचार्यैरेवमुक्तत्वात्॥ इदमपि योगिप्रत्यक्षे
विषयस्य न कारणत्वं॥ ज्ञायमानं सामान्यं न प्रत्यासत्तिः॥ ज्ञायमानं लिंगं नानुमितिकारणमित्यभिप्रायेण
ने तु कारणत्वं किं अत आह॥ अन्यथेति॥ तस्य कारणत्वस्य॥ तथेति समवायादिकारणे असन्नपि॥ प्रत्यासन्ने॥॥
य सामान्यप्रत्यासत्त्या ज्ञानसंभवात् इति रूपाभवत् अतींद्रियसामान्यं ... संनिकृष्टपरमाणुज्ञानं प्रति ...
नं सामान्यं न प्रत्यासत्तिः अपि सामान्यज्ञानं प्रत्यासत्तिः इत्यभिप्रायेण अतींद्रियसामान्यस्यापि कारणं न भवतीत्युक्तं॥ ज्ञायमा
रणं न भवतीत्युक्तं न त्रसरेणौ न तु परमाणु अस्मात् ... विशेषात् ... अनुमानस्य ... परमाणुभेद ... विशेषाः कस्याका
कत्वेन कारणत्वं भवती॥ इति चेन्न ज्ञायमानं लिंगं नानुमितिकारणं अपि तु लिंगज्ञानं अनुमितिकारणं विशेषरूपलिंगं अनुमितिप्रति कारणं न भ

नेति॥
५

जनकं कारणं॥ द्वितीयमसमवाइकारणमित्यर्थः॥ अत्र यद्यपि तुरीतंतुसंयोगस्य पटासवाइकारणत्वं स्यात्॥ ए
वं वेगादिनामभिघाताद्यसमवाइकारणत्वं स्यात्॥ तव ज्ञानादीनामभिघाद्यसमनाइकारणत्वं स्यात्॥ तथापि प
टासमवाइकारणलक्षणे तुरीतंतुसंयोगभिन्नत्वं देयं॥ अन्यथा तुर्यामपि पटोत्पत्तिः स्यात्॥ तुरीतंतुसंयोगस्तु तुरी
पटसंयोगं प्रति असमवाइकारणं भवत्येव॥ तव वेगादिसंस्कारनाद्यसमवाइकारणं भवत्येवेति॥ तत्तत्कार्यासमवा
इकारणलक्षणे तत्तत्भिन्नत्वं देयं॥ आत्मविशेषगुणानां तु कुत्राप्यसमवाइकारणत्वं नास्तीति तत्तद्भिन्नत्वं सामा
न्यलक्षणे देयमेव॥ अत्र समवाइकारणत्वं प्रत्यासन्नत्वं द्विविधं कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यास
त्त्या च॥ आद्यं यथा घटादिकं प्रति कपालसंयोगादिकमसमवाइकारणं॥ तत्र कार्येण घटेन सह कारणस्य क
पालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति॥ द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवाइकारणं॥ त
त्र घटरूपं प्रति घटस्तेन सह कापालरूपस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति॥ तथा च कश्चित्समवायसंबंधे
न कश्चित्स्वसमवाइसवेतत्वसंबंधेनेति फलितोर्थः॥ तथा च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या का

॥मुक्ता०॥
५

रणं ॥ ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसन्नं ॥ आभ्यां समवाय्यसमवायिकारणाभ्यां प॥
रं भिन्नं तृतीयं निमित्तकारणमित्यर्थः ॥ इदानीं अन्यथासिद्धत्वमेव कियन्तीत दाह येनेत्यादिना ॥ यत्कार्यं प्रति का
रणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः ॥ यथा घटं प्रति दण्डत्वं द्वितीयमन्य
५२ थासिद्धमाह ॥ कारणमिति ॥ यस्य कार्यं प्रति स्वातंत्र्येणान्वयव्यतिरेकौ न स्तः किंतु कारणमादाय येनान्व
यव्यतिरेकौ गृह्येते तस्य तत्कार्यं प्रति अन्यथासिद्धत्वं ॥ यथा घटं प्रति दंडरूपं ॥ तृतीयमन्यथासिद्धमाह
अन्यं प्रतीति ॥ अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रति अन्यथा
सिद्धत्वं ॥ यथा घटादिकं प्रति आकाशस्य ॥ आकाशस्य हि घटादिकं प्रति आकाशत्वेन कारणत्वं स्यात् ॥ आका
शत्वं तु शब्दसमवायिकारणत्वं ॥ जनकं शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तस्या
न्यथासिद्धं ॥ ननु शब्दाश्रयत्वेन तस्य कारणत्वेऽन्यथासिद्धिरिति चेन्न पंचमी ग्रहणात् ॥ अथाकाशस्य श
ब्दं प्रति जनकत्वे किमवच्छेदकमिति चेन्न ॥ कत्वादिकं विशेषपदार्थो वेति ॥ चतुर्थमन्यथासिद्धमाह ॥ ज
नकं प्रतीति ॥ यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्का

॥ना॥
५

असमवाइकारणत्वं गुणकर्मणोः साधर्म्यमुक्तं तेनात्मवृत्तिज्ञानादिविशेषगुणेष्वव्याप्तिः कुतः आत्मज्ञानादिविशेषगु
णानां असमवाइकारणत्वाभावात् ॥ द० अ० जो० सा० ध० असमवाइकारणत्व, नैसर्गिकजातियोग्यतानिरूपितविशेषरूपाज्ञा
तिः वादइ आत्मवृत्तित्वं न वर्ततेइति स्तनाव्याप्ति ॥

यन्नतिअन्यथासिद्धत्वं ॥ यथा कुलालपितुर्घटं प्रति ॥ तस्य कुलालपितृत्वेन घटं प्रति जनकत्वेन्यथासिद्धिः
कुलालत्वेन रूपेण जनकत्वे इष्टापत्तिः ॥ कुलालमात्रस्य घटं प्रति जनकत्वात् ॥ पंचममन्यथासिद्धमाह ॥ अतिरिक्ते
से मितिः ॥ अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः ॥ अत एव प्रसङ्गसमहत्वं कार
णं ॥ अनेकद्रव्यसमवेतत्वमन्यथासिद्धं ॥ न चैवं परीक्षिति विनिगमकमिति वाच्यं ॥ महत्त्वजातेः कारणताव
च्छेदकत्वे लाघवात् ॥ [illegible] तेनैव रासभादिरिति ॥ यद्घटव्यक्तिं प्रति रासभस्य नियत
ततेरा नियतपूर्ववर्तित्वमस्ति तत्र घटसजातीयं प्रसिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि संभवे रासभो अन्यथा
सिद्ध इति भावः ॥ एते चेति ॥ एतेषु पंचसु अन्यथासिद्धेषु मध्ये पंचमो अनन्यथासिद्धे आवश्यकः ॥ ए
नैव परेषां चारितार्थत्वात् ॥ तथा हि ॥ दण्डादिभिरेव अवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसंभवे दण्डत्वादि
कमन्यथासिद्धं ॥ ननु चैवं परीक्षिति विनिगमकमिति वाच्यं ॥ दण्डत्वस्य कारणत्वे दण्डघटितपरंपरायाः संबं
धत्वकल्पना [illegible] गौरवात् ॥ एवमन्येषामप्यनेन चारितार्थत्वं संभवति ॥ गुणकर्मेति ॥ असमवाइकारण
त्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यमित्यत्रापि तात्पर्यं ॥ अपास्तमवाइकारणत्वस्य

साक्षात्जन्यमात्रवृत्तिसंबंधेन

सत्ताभिन्नजातिमत्त्वं न दर्थः ॥ तेन ध्वंसादीनां समवायिकारणत्वविरहेऽपि नाव्याप्तिः ॥ अन्यत्रेति ॥ नित्यद्रव्याणि प
रमाण्वाकाशादीनि विहाय ॥ आश्रितत्वं साधर्म्यमित्यर्थः ॥ आश्रितत्वं तु समवायादिसंबंधेन वृत्तिमत्त्वं ॥ विशेषणतया
नित्यानामपि कालादौ वृत्तेः ॥ कालिकविशेषणतातिरिक्तसंबंधेन वृत्तिमत्त्वं ॥ तेन समवायस्य समवायेना
वृत्तावपि न क्षतिः ॥ इदानीं द्रव्यस्यैवावशिष्टसाधर्म्यं वक्तुमुपक्रमते ॥ क्षित्यादीनामिति ॥ क्षितिर्जलमिति ॥ क्षि
तिस्तेजो वायुमनसां परत्वमपरत्वं मूर्तत्वं ॥ कर्मवत्त्वं वेगवत्त्वं च साधर्म्यं ॥ न च घटत्वपटत्वादौ परत्वमपरत्वं वा
नोत्पन्नं ॥ तत्राव्याप्तिरिति वाच्यं ॥ परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥ मू
र्तत्वमपकृष्टपरिमाणवत्त्वं तच्चैतेषामेव ॥ गगनादिपरिमाणस्य कुतोऽप्यपकृष्टपरिमाणत्वाभावात् ॥
पूर्ववत् कर्मवत्त्वं ॥ कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं ॥ वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं च
बोध्यं ॥ कालेति ॥ कालाकाशात्मदिशां सर्वगतत्वं सर्वमूर्तसंयोगित्वं परममहत्त्वं च ॥ परममहत्त्वं जातिवि ल
शेषः ॥ अपकर्षानाश्रयपरिमाणत्वं वा ॥ क्षित्यादीति ॥ पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं ॥ तच्च बहिरिं
द्रियग्राह्यविशेषगुणवत्त्वं ॥ अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम् ॥ तेन क्षात्रोघटवृत्ति

यत्प्रत्यक्षज्ञानस्याप्युपनीतभानविषयत्वात् ॥ न इति आत्मनि नातिव्याप्तिः ॥ न वा मनस्यप्रत्यक्षविषयरूपादिमति परिमाणवा
दावतिव्याप्तिः ॥ तस्यापि स्वरूपयोग्यत्वात् ॥ महत्त्वलक्षणकारणान्तरासंनिधानान्मनसोऽप्रत्यक्षत्वं ॥ अथवा आत्मवृत्ति
विशेषगुणवत्त्वं ॥ चत्वारीति ॥ पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वं ॥ द्रव्यारंभ इति ॥ पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यार
भकत्वं ॥ न च द्व्यणुकानारंभकेषु परमाणुष्वव्याप्तिः ॥ द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्
आकाशादीनामिति ॥ आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं ॥ आकाशस्य विशेषगुणः शब्दः ॥ स च व्याप्य
वृत्तिः ॥ यत्र किंचिदवच्छेदेन शब्द उत्पद्यते ॥ तत्रान्यावच्छेदेन ॥ तदभावस्यापि सत्त्वात् ॥ क्षणिकत्वं च तृतीयक्षणवृ
त्तिध्वंसप्रतियोगित्वं ॥ योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नविशेषगुणनाश्यत्वात् ॥ अथवा शब्दस्य द्वितीय
क्षणे नाशः ॥ एवं ज्ञानादीनामपि ज्ञानादिकं हि आत्मनि ॥ विशेषशरीरावच्छेदेनोत्पद्यते ॥ यदनवच्छेदेन तदभाव
वोऽस्त्येवं ज्ञानादिकं हि लक्षणद्वयस्यापि ॥ एतच्चाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं वार्थः ॥ पृथि
व्यादिरूपादिविशेषगुणो नास्तीत्यव्याप्यवृत्तीत्युक्तं ॥ पृथिव्यादावव्याप्यवृत्तिः ॥ संयोगादिरस्तीति विशेषगुणे
त्युक्तं ॥ न च रूपादिनापि कदाचित्तृतीयक्षणे नाशसंभवात् ॥ क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तिरिति

वाच्यं॥ न तु लक्षणवृत्तिजन्मावृत्तिजातिमद्विशेषगुणवत्त्वं तदर्थत्वात्॥ अपेक्षाबुद्धेः क्षणत्रयं तिष्ठति॥ क्षणचतुष्ट
यं न किमपि॥ जन्यज्ञानादिकं तिष्ठति॥ रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्त्तत इति तदुदासः॥
ईश्वरज्ञानस्य तु क्षणवृत्तित्वात् ज्ञानत्व तद्वृत्तित्वाज्जन्येत्युक्तं॥ यदा कादाचिज्जीवात्मनोः साधर्म्यं तदा जन्ये
२ ति नव्येयं॥ द्वेषत्वादिकमादाय लक्षणसमन्वयात्॥ परममहत्त्वस्य नाशाद्गुणत्वाव्याप्यलक्षणे द्वित्वादीना
मपि नाशाभ्युपगमात्॥ द्वित्वादीनामपि नाशात्वात् तद्वारणाय विशेषेति॥ क्षणवृत्तित्वं वाच्यं॥ ८ रूपादि
दिकमादायात्मनि॥ लक्षणसमन्वयात्॥ रूपेति॥ यद्यपि तेजसां द्रव्यत्ववत्त्वं प्रत्यक्षविषयत्वं चेत् सम्भवः॥ न च चक्षु
रादीनामर्जनकपालस्थानेऽरूपत्वे किंमानमिति वाच्यं॥ तत्रापि तैजसत्वेन रूपानुमानात्॥ तदेवानी
न एषितीवि॥ (?) त्वादिना रूपानुमानं बोध्यं॥ न च परादौ॥ द्रुतसुवर्णादिभिन्ने तैजसे च द्रवत्वसत्त्वानुमव्याप्तं॥ द्रवत्वव
ह्निद्रवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ घृतजतुप्रभृतिषु पार्थिवेषु द्रुतसुवर्णादौ तैजसे च द्रवत्वसत्त्वात्॥
नेत्र यद्यपि त्वादिमत्त्वात् तदादाय सर्वत्र लक्षणसमन्वयः॥ न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तं रूपादाविति वाच्यं॥

लौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्याविवक्षितत्वात्॥ आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति
गुरूणीति॥ गुरुत्ववत्वं रसवत्वं च पृथिवीजलयोरित्यर्थः॥ न च घ्राणेंद्रियादीनां वायवानीतपार्थिवभागानां
च रसादिमत्वे किं मानमिति वाच्यं॥ तत्रापि पृथिवीत्वादिनानुमानात्॥ द्वयोरिति॥ पृथिवीतेजसोरि
त्यर्थः॥ न च नैमित्तिकद्रवत्ववत्वं घृतादेरनहाया दोषो व्याप्तमिति वाच्यं॥ नैमित्तिकद्रवत्वसमाना
धिकरणद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात्॥ आत्मनीति॥ पृथिव्यप्तेजोवायवाकाशात्मनां विशे
षगुणवत्वमित्यर्थः॥ यदुक्तमिति॥ ज्ञेयत्वादिकं विहायेति बोध्यं॥ ननु न कस्यापि वैधर्म्यं॥ केवलान्व
इत्वात्॥ तेच संख्यादयः पंच॥ खे आकाशे साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रसके पृथिव्यादिकं निरू
पयति॥ तत्र क्षितिरित्यादिना॥ गंधहेतुरिति॥ गंधसमवायिकारणत्वमित्यर्थः॥ यद्यपि गंधवत्वमा
त्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं॥ तथाहि॥ पृथिवीत्वं
गंधसमवायिकारणतावच्छेदकतया सिध्यति॥ अन्यथा गंधत्वावच्छिन्नस्याकस्मि[illegible]कत्वापत्तेः॥

पु न्या० ॥
॥ ६ ॥

[illegible] यद्द्रव्यं भस्मरूपद्रव्यं यद्द्रव्यध्वंसजन्यं पाषाणरूपद्रव्यध्वंसजन्यं तद्द्रव्यं भस्मरूपद्रव्यं तदुपादानो
पादेयं तस्य पाषाणस्य उपादानपरमाणवः तदुपादेयत्वं तज्जन्यत्वं भस्मनि वर्तते ॥ यद्द्रव्यं खंडपटरूपद्रव्यं महापटरूपध्वंसजन्यं
तत् खंडपटरूपद्रव्यं तस्य महापटस्य उपादानं तंतवः तदुपादेयत्वं खंडपटे वर्तते ॥

नन्व पाषाणादौ गंधाभावात् ॥ गंधवत्त्वमव्याप्तमिति वाच्यं ॥ तत्रापि गंधसत्वात् ॥ अनुपलब्धिस्तु अनुत्कट
पु त्वेनोपपद्यते ॥ कथमन्यथा तद्भस्मनि गंध उपलभ्यते ॥ भस्मनोपि पाषाणध्वंसजन्यत्वात् ॥ पाषाणो
पादानोपादेयत्वं ॥ सिध्यति ॥ यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः ॥ दृष्टं चैतत् खंड
पटे ॥ महापटध्वंसजन्येपि ॥ इत्थं च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यपाषाणस्यापि पृथिवीत्वा
त् ॥ तस्याच्च तस्यापि गंधवत्त्वे बाधकाभावः ॥ नानारूपेति ॥ शुक्लनीलादिभेदेन नानाजातीयं रूपं पृ
थिव्यामेव वर्तते न तु जलादौ ॥ तत्र शुक्लरूपस्यैव सत्वात् ॥ रूपद्वयवत्ति द्रव्यत्वव्याप्यजातिमत्वस्य रूपनाना
वत्ति द्रव्यत्वव्याप्यजातिमत्वस्य वा [illegible] व्याप्यत्वात् ॥ २ ॥ १ ॥ पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन
नानारूपसंभावात् ॥ न च तत्र नानारूपं नास्त्येव तत्राव्याप्तिः ॥ १ ॥ वैशेषिकनये पृथिवीयपरमाणौ रूपना
शस्य रूपांतरस्य च सत्वात् ॥ न्याये नये घटादावपि तत्सत्वात् लक्षणसमन्वयः ॥ षड्विध इति ॥ म
धुरकटुकषायादिभेदेन षड्विधो रसः ॥ स पृथिव्यामेव ॥ जले तु मधुर एव रसः ॥ अत्रापि पूर्ववत्
त् रसद्वयवद्वृत्ति द्रव्यत्वव्याप्यजातिमत्वं लक्षणार्थो अवसेयः ॥ गंधास्त्विति ॥ वस्तुस्थितिमात्रं ॥

॥ न्या ली० ॥

ननु द्विविधगंधवत्वमपि लक्षणं द्विविधत्वस्याव्याप्यत्वात् ॥ द्वैविध्यं च सौरभासौरभभेदेन बोध्यं ॥ स्पर्श इति ॥
पृथिव्याः अनुष्णाशीतस्पर्शवत्वे ॥ वायावपि वर्तनंत इति द्रष्टव्यं ॥ पाकज इति ॥ तु संघे पृथिव्याः स्पर्शोनुष्णा
शीतेन इति ॥ ज्ञापनार्थं तु उक्तं पाकजस्पर्शवत्वमात्रं लक्षणं ॥ अपि नैप्यप्योतू ॥ यद्यपि पाकजस्पर्शः पटादौ नो
व स्ति ॥ तथापि पाकजस्पर्शवद्वृत्ति द्रव्यत्वव्याप्यजातिमत्वं अर्थो बोध्यः ॥ नित्येति ॥ सा द्विवि
धा ॥ नित्यानित्या ॥ अणुलक्षणा परमाणुरूपा पृथिवी नित्या तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिः
सर्वाण्यनित्येत्यर्थः ॥ सेवेति ॥ अनित्यापि पृथिवी मेनायनवनीसर्गः ॥ न च यदि निर्दिमानं परमाणुपुंजे
रिवोमहति ॥ न च परमाणूनामतींद्रियत्वात् ॥ घटादेः प्रत्यक्षं न स्यादिति वाच्यं ॥ एकस्य परमाणोः प्र
त्यक्षेपि न तत्समूहस्य प्रत्यक्षत्वात् ॥ यथैकस्य दूरे अप्रत्यक्षत्वेपि ॥ न महत्स्य प्रत्यक्षत्वं ॥ न चैकः स्थूलो
घट इति बुद्धेरनुपपत्तिरिति वाच्यं ॥ एकोमहान् घट इत्याकारा प्रमिति तदुपपत्तेः मैवं ॥ परमाणोरतींद्रिय
त्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात् ॥ दूरस्थकेशस्तु नातींद्रियः संनिधाने तस्यैव प्रत्यक्षत्वात्
न चैतदतींद्रियपरमाणुपुंजसोत्पन्नत्वान्नेमे प्रत्यक्षत्वेपि विरोध इति वाच्यं ॥ अदृष्टसहकृतानुपादानत्वात् ॥

अन्यथा चक्षुरस्पार्शसंततेनोकदाचिन्नद्रव्यत्वप्रसंगात् ॥ नन्वात्रिनसनैतलादेकथमुद्भूतरूपहनसंततेद्रव्यद्र-
हनोस्तीति वाच्यं ॥ तत्र तदन्तःपातिभिर्द्रव्यद्रहनोवयवैः स्थूलदहनोत्पत्तेरभ्युपगमात् ॥ न चाद्रव्ये
न घणुके न कर्पद्रव्यत्रसरेणोरसतीति वाच्यं ॥ यतोनन्तर्यद्रव्यत्वे महद्रूपत्वेनाकस्याचिन्नुस्वभावास
चक्षुषहपरं तु महत्त्वोद्भूतरूपादिसमुदायकारणत्वस्य द्रव्यत्वं ॥ तद्भावे चाद्रव्यत्वं ॥ तथा च त्रसरेणोर्महत्-
त्वान्नत्यक्षत्वं ॥ न तु घणुकादेः तदभावात् ॥ न हि त्वमते पीदं संभवति ॥ परमाणौ महत्त्वाभावात् ॥ द्रप
चेअवयवविस्तिच्छे तेषामुत्पादविनाशयोः ॥ प्रसक्तस्तित्वात् अनित्यत्वं ॥ तेषां च अवयवधारायाः अनन्त-
त्वे मेरुसर्षपयोरपि साम्यप्रसंगो ॥ अतः क्वचिद्विश्रामो वाच्यः ॥ यत्र विश्रामः स एव नित्यत्वे असमवे-
तकार्योत्पत्तिप्रसंगात् ॥ तस्य नित्यत्वं ॥ महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाण-
तारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः ॥ न च त्रसरेण्वावेव विश्रामोस्त्विति वाच्यं ॥
त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः महदारं-
भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः न चेदमप्रयोजकं ॥ अपकृष्टमहत्त्वं प्रति अनेकद्रव्य-
समवेतत्वस्य प्रयोजकत्वात् ॥ न चैवं क्रमेण तदवयवधारापि सिद्ध्येदिति वाच्यं ॥ अनवस्थाभयेन तदसिद्धेः

सा च त्रिधेति ॥ सा कार्यरूपा पृथिवी त्रिविधा ॥ शरीरेन्द्रियविषयभेदात् ॥ तत्र देहमुदाहरति ॥ योनिजादी
ति ॥ योनिजमयोनिजं चेत्यर्थः ॥ योनिजमपि द्विविधं ॥ जरायुजमंडजं चेति ॥ जरायुजं मानुषादीनां
अंडजं सर्पादीनां ॥ अयोनिजं स्वेदजोद्भिज्जादीनां ॥ स्वेदजाः २मिदंशाद्याः ॥ उद्भिज्जाः तरुगुल्माद्याः ॥ नारकी
णां शरीरमप्ययोनिजं ॥ न च मनुष्यादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यं ॥ गंधादिमत्त्वस्यैव प्रमाणात्
न च क्लेदोष्मादेरुपलंभादाप्यत्वादिकमपि स्यादिति वाच्यं ॥ तथा सति जलत्वपृथिवीत्वादिना संकरात् ॥
५ न च तर्हि जलादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यं ॥ क्लेदादीनां विनाशेऽपि शरीरत्वे न प्रत्यभिज्ञानात् ॥ गंधाद्यु
पलब्धेश्च पृथिवीत्वसिद्धेः ॥ तेन पार्थिवादिशरीरे जलादीनां निमित्तमात्रत्वं बोध्यं ॥ शरीरत्वं तु न जातिः ॥ पृथि
वीत्वादिना सांकर्यात् ॥ किं तु चेष्टाश्रयत्वं ॥ २क्षादेर्नामपि चेष्टाश्रयत्वात् ॥ नाव्याप्तिः ॥ न च वृक्षादेः शरी
रत्वे किं मानमिति वाच्यं ॥ आध्यात्मिकवायुसंबंधस्य प्रमाणत्वात् ॥ तत्रैव किं मानमिति चेत् भग्नक्षतसं
रोहणादिना तदुन्नयनात् ॥ यदि हस्तादौ शरीरव्यवहारो न भवति ॥ तदंत्यावयवित्वेन तद्विशेषणत्वं ॥ न च
यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यं ॥ तादृशे प्रमाणाभावात् ॥ अथवा चेष्टावदंत्यावयवि

वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं असाधारणविमात्रवृत्ति चेष्टावद्वृत्ति जातिमत्त्वं वा ॥ तत्र मानुषत्वं चैत्रत्वादिजा
तिमादाय लक्षणसमन्वयः ॥ ननु च नृसिंहशरीरे कथं लक्षणसमन्वयः ॥ तत्र नृसिंहत्वस्यैकमात्रवृत्ति
त्वया जातित्वाभावात् ॥ जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावात् ॥ कथमेतदिति
वाच्यं ॥ कल्पभेदेन नृसिंहशरीरस्यैव नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात् ॥ इन्द्रियमिति ॥
घ्राणेन्द्रियं पार्थिवमित्यर्थः ॥ पार्थिवत्वं कथमिति चेन्न ॥ इदं घ्राणेन्द्रियं पार्थिवं रूपादिषु पञ्चसु मध्ये गन्ध
स्यैव व्यञ्जकत्वात् ॥ कुङ्कुमगन्धाभिव्यञ्जकघृतादिवत् ॥ न च दृष्टान्ते स्वीयरूपादिव्यञ्जकत्वादसि
द्धिरिति वाच्यं ॥ परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् ॥ न च शरीरावयवगन्धव्यञ्जकजलेनैकान्ति
कत्वमिति वाच्यं ॥ तस्य तु रसाभिव्यञ्जकत्वात् ॥ यद्वा परकीयेति न देयं ॥ वाय्वानीतसुरभिभाग
स्पर्शनासम्भवात् ॥ न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यं
द्रव्यत्वे सतीति विशेषणात् ॥ विषयेति ॥ उपभोगसाधनं हि विषयः ॥ सर्वमेव कार्यजातमदृष्टाधीनं
तत्तदुपभोगसाक्षात्परम्परया वा जनकत्वेन न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति ॥ ते

न्त्र्यणुकादिकं त्वग्राह्यं तं विषयो भवति॥ शरीरेन्द्रिययोर्विषयत्वेपि भिन्नकारान्तरेणोपन्यासः॥ शीघ्रबु
द्धिवैशद्यार्थः॥ जलं निरूपयति वर्णः शुक्ल इति॥ स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः
सिध्यति॥ यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं बोध्यं॥ अथ प
रमाणौ जलत्वं न स्यात्तत्र जन्यस्नेहाभावात्॥ तस्य नित्यस्य स्वरूपयोग्यत्वे फलावश्यकभावनियमादि
ति चेन्न॥ जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकत
या जलत्वजातिसिद्धेः॥ शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति॥ ननु शुक्लरूपवत्त्वं ल
क्षणं॥ अथवा नैमित्तिकद्रवत्ववृत्तिशुक्लरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्य[illegible]जातिमत्त्वं अभास्वरशुक्ले
तररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः॥ रसस्पर्शाविति॥ जल
स्य मधुरत्वं रसज्ञानं त्वस्पर्शः॥ तिक्तावनिमधुररस[illegible]वद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः
तेन शर्करादौ नाव्याप्तिः॥ विक्षेपेति॥ ननु शुक्लरूपमेवेति कुतः॥ कालिन्दीजलादौ नीलमोपलब्धेरि

रितिवाच्यं ॥ नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावात् ॥ कालिंदीजले नीलरूपप्रतीतिस्त्वाश्रयोपाधि
कीअनुतव वियति विक्षेपे धवलिमोपलब्धेः अपलेलमा धूर्वेक्षिमानं ॥ नहि प्रत्यक्षेण कोपि रसस्तत्रा
नुभूयते ॥ नच नारिलजलादौ माधुर्यमुपलभ्यन तवेति वाच्यं ॥ तस्याप्याश्रयोपाधिकत्वात् ॥ अन्यथा
जंबीरादिरसादौ वाऽम्लाद्युपलब्धेः अम्लादिमत्वमपि स्यात् इति चेन्न ॥ हरितकपादिभक्षणस्य
जलरसव्यंजकत्वात् ॥ नच हरितकपामेव [illegible] जलोष्ण संयोगात् प्रसांतरोत्पत्तिरिति वाच्यं ॥ कल्पना
गौरवात् ॥ पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वात् ॥ जलेनाम्लादिकं ॥ जंबीररसादौ त्वा
श्रयोपाधिकी तथा प्रतीतिः ॥ तथैव जन्यउष्णस्पर्शजनकतावच्छेदकं जलत्वं बोध्यं ॥ घृष्टचंदना
दौ मुखौ संयोपलब्धिश्चंदनांतरवर्तिउष्णस्पर्शस्य सलिलस्यैव तेजःसंयोगात् जले उष्णत्वप्रतीतिरौ
पाधिकी सुटैवत त्र पाकासंभवात् ॥ स्नेहस्तत्रैति ॥ घृतादावपि तदंतर्वर्तिजलस्यैव स्नेहः

मैत्रादेः कर्तृत्वमिष्टमेव ॥ अत्र ग्मामानुकूलव्यापारो णिजंतार्थः ॥ तदनुकूलव्यापाराश्रयस्तस्य तत्र णिजर्थव्यापा
र स्यापि गघनीसाध्यस्यानार्थत्वात् ॥ अनुकूलवृत्तिमत्वस्यान्यत्र सत्वाच्चेति ॥ यद्वा णिजर्थव्यापारे मैत्रमि
त्रमिश्रस्यनान्वयः ॥ तथात्वे धात्वर्थव्यापारस्य मैत्रनिष्ठमैत्रस्यकर्मत्वनापत्तेः ॥ किंतु गमनेग्रामवृत्तिसंयोगा
नुकूलव्यापाराश्रयत्ववान्चैत्रः इत्यन्वयबोधात् ॥ तथापि गमनान्वितद्वितीयार्थवृत्तित्वान्वितत्वेन मैत्रस्यकर्त
त्वमप्रसूहमिति ॥ किमाख्यातपदेनेति व्यभाष्यते ॥ तदाकर्तृत्वविशिष्टस्यकर्तृत्वरूपतावारणायतदुपा
त्रि त्तं ॥ नहि [illegible] कर्मीत्यादेः कर्तृत्वरूपत्वे अनेहितेकर्तरीत्यादिअनुशासनानार्थः ॥ संगच्छतइत्याहुः ॥ यत्तुस्वतंत्रः ॥

पाकादिकर्तृत्वं ईश्वरस्येष्टं ॥ तथा विवक्षायां ईश्वरः पचतीति प्रयोगोऽपीष्ट एव ॥ नो चेत् कार्यत्वावच्छिन्नजन्यतानिरू
पितत्वस्य साधारणत्वं ॥ निवेश्यमिति निष्पादकाः ॥ वैयाकरणास्तु ॥ अनभिहिते कर्तरि इत्यादौ वचनेनापि कर्तृप
दप्रयोगात् ॥ क्रियाश्रयत्वं कर्तृत्वं ॥ कारकं कर्मादिपदवत् कर्त्राइस ववरधातुरिवपि क्रियार्थकत्व आश्रयत्वमिहल
ता त्वात् सर्वार्थः ॥ तथा च धात्वर्थसमभिव्याहृतास्येन यद्धात्वर्थान्वितधर्मवत्त्वं बोध्यते तेन धात्वर्थनिरूपिततद्धर्मवत्त्वं
तद्धात्वर्थकर्तृत्वं ॥ यथा पचतीत्यादौ पाकानुकूलव्यापारवत्त्वं ॥ जानातीत्यादौ ज्ञानाश्रयत्वं ॥ नश्यतीत्यादौ नाशप्रतियो
गित्वं ॥ चैत्रेण तण्डुलः पच्यते इत्यादौ पाकजन्यफलाश्रयत्ववारणाय यागाघसमभिव्याहृतेति ॥ अतश्चैत्रादेः कर्तृत्वं तु
पचतीत्याख्यातबोध्यधर्ममादायैवेति बोध्यं ॥ धात्वर्थान्वितद्वितीयार्थकर्मत्वकरणत्वादिवारणाय आख्यातेनेति ॥ जाना
तीत्यादावाख्यातार्थाश्रयत्वं तथा कर्तृत्वं ॥ हन्तीत्यत्र हिंसार्थत्वं गमनकर्तृत्वं ॥ इत्येतत्संपत्तये यत्नेति धात्वर्थविशेषणं देयं
यदि काष्ठं पच्यतीत्यस्थाली पचती तण्डुलाः पच्यन्ते इत्यादौ करणादीनां कर्तृत्वं दृष्टं ॥ पच्यते ओदनः स्वयमेवेत्यादौ कर्मकर्त
रि करणेऽपि तदिष्टं ओदनः स्वयं पचतीत्यादौ प्रयोगस्तु असाधारण्यादिति ॥ चैत्रो मैत्रं ग्रामं गमयतीत्यादौ अपि

जलस्य स्नेहसमवायिकारणत्वात्॥ तेन जले स्नेहत्ववद्वृत्तिमत्त्वं॥ द्रवत्वमिति॥ सांसिद्धिकद्रवत्वत्वं जातिविशे
षः॥ ननु लक्ष्यातिच्छन्नस्य द्रवत्वस्य नजनकतावच्छेदकंमपि तदेवेति भावः॥ तैलादावपि जलसंयोगवद्द्रवत्वं॥ स्नेहप्रकर्षेण
दहनानुकूलत्वमिति वक्ष्यते॥ नित्यतादीति॥ नित्यतादिप्रथमवत्॥ प्रथममिति॥ पृथिव्यामिवेत्यर्थः॥ तथा हि जल द्वि
धं॥ परमाणुरूपं नित्यं द्व्यणुकादिकं सर्वमप्यनित्यं अवयवसमवेतं च॥ अनित्यमपि त्रिविधं शरीरेंद्रियविष
यभेदात्॥ किंतु पार्थिवतो विशेषस्तमाह किंत्विति॥ अयोनिजमिति॥ अयोनिजमेवेत्यर्थः॥ जलीयशरीरम
योनिजं न भवति लोके प्रसिद्धं॥ इंद्रियमिति॥ इंद्रियं रसनं जलीयमित्यर्थः॥ तथा हि रसनं जलीयं गंधाद्यव्यं
जकत्वे सति रसव्यंजकत्वात्॥ सक्तुरसाभिव्यंजकोदकवत्॥ वायवानीतसुरभिभागवद्धा॥ रसनसंन्निकर्षे व्य
भिचारवारणाय द्रव्यत्वं देयं॥ विषयं दर्शयति॥ सिंधुर्हिमादिरिति॥ सिंधुः समुद्रः हिमस्तुषारः॥ आदिपदात्स
रित्कासारकरकादिः सर्वोऽपि ग्राह्यः॥ न च हिमकरकयोः कठिनत्वात्॥ पार्थिवत्वमिति वाच्यं॥ इति न च वा
च्यं॥ उष्मणा विलीनयोः जलत्वस्य प्रत्यक्षसिद्धत्वात्॥ यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेः॥ जलोपादानो
पादेयत्वसिद्धेः॥ अदृष्टविशेषेण द्रवत्वविरोधानु करकायां काठिन्यप्रत्ययस्य भ्रान्तित्वात्॥ तेजो निरूपयति

उष्णस्पर्श इत्यादिना ।। उष्णत्वं स्पर्शनिष्ठजातिविशेषः प्रत्यक्षसिद्धः ।। इदं च जन्योष्णस्पर्शसमवायिकारणतावच्छे
दकतया तेजस्त्वजातिसिद्धिः ।। तस्य परमाणुरिति त्वं जलत्वस्यानुसंधेयं ।। न चोष्णस्पर्शवत्वं चंकिरणादावव्या २
प्तमिति वाच्यं ।। तत्रापि उष्णत्वस्य सत्वात् ।। किंतु तदंतःपातिजलस्पर्शेनाभिभवान्न गृह्यते ।। एवं रत्नकिरणादौ
पार्थिवस्पर्शेनाभिभवात् चक्षुरादौ चानुद्भूतत्वान्न गृह्यते ।। रूपमित्यादि ।। वैश्वानरे मरकतकिरणादौ च पा
र्थिवरूपेणाभिभवात् शुक्लत्वाग्रहात् ।। तद्रूपाग्रहे धर्मिणोपि चाक्षुषत्वं न स्यादिति वाच्यं ।। इति न च वाच्यं ।। अ
न्यदीयरूपेणैव धर्मिणो ग्रहसंभवात् ।। शंखस्यैवापि तत्पीतिम्ना ।। वह्नेः शुक्लरूपेनाभिभूतं किंतु तदीयशुक्ल
त्वमभिभूतमित्यन्ये ।। नैमित्तिकमिति ।। सुवर्णादिरूपे तेजसि तत्सत्वात् ।। न च नैमित्तिकद्रवत्ववत्वं न लक्षणं दह
नादावव्याप्तेः घृतादावतिव्याप्तेश्चेति वाच्यं ।। इति न च वाच्यं ।। पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिजातिमत्वस्य वि
वक्षितत्वात् ।। पूर्ववदिति जलस्येवेत्यर्थः ।। न पादि तेजोपि द्विविधं ।। नित्यमनित्यं च ।। परमाणुरूपं नित्यं तदन्यदनि
त्यं ।। अनित्यं त्रिधा ।। शरीरेन्द्रियविषयभेदात् ।। शरीरमयोनिजमेवेति ।। तच्च सूर्यलोकादौ प्रसिद्धं ।। अत्र यो
विशेषः समाह ।। इंद्रियमिति ।। चक्षुस्तैजसं परकीयस्पर्शाद्यव्यंजकत्वे सति परकीयरूपव्यंजकत्वात् ।। प्रदी

पवत्॥ प्रदीपस्य स्वीयस्पर्शव्यंजकत्वात् परकीयेति॥ पटादेः स्वीयरूपव्यंजकत्वात् व्यभिचारवारणाय इदि
तियं परकीयेति॥ अथवा प्रभाया उष्णत्वसंभवात् आद्यं परकीयेति न देयं॥ चक्षुः संनिकर्षव्यभिचारवारणा
य इदं पदं देयं॥ विषयं दर्शयति॥ वह्नीति॥ ननु सुवर्णस्य तैजसत्वे किं मानं इति चेन्न॥ सुवर्णं तैजसं असति प्रतिबंध
के अत्यंतानलसंयोगेपि अनुच्छिद्यमानद्रवत्ववत्त्वात्॥ यन्नैवं तन्नैवं॥ यथा पृथिवीति॥ न चात्र योजकं पृथिवीद्रव
स्य जेन्य जलद्रवत्वस्य चास्यं नाग्निसंयोगनाश्यत्वात्॥ ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वात् ते
न व्यभिचारः इति चेन्न॥ जलमध्यस्थमषीक्षोदवत्तस्याद्रुतत्वात्॥ अपरे तु पीतिमाश्रयस्यात्यंताग्निसंयोगेपि
पूर्वरूपापरावृत्तिदर्शनात् तत्र प्रतिबंधकं विजातीयं द्रवद्रव्यं कल्पते॥ तथाहि॥ अग्नि[illegible] संयोगपीतिमगुरु
त्वाश्रयो विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः॥ अत्यंताग्निसंयोगेपि पूर्वरूपविजातीयरूपानधीकरण
त्वात्॥ न स॰ जलमध्यस्थपीतपटवत्॥ तस्य च पृथिवीजलभिन्नस्य रूपवत्वेन तेजस्त्वनियमात्॥ वायुं निरूपयति
अपाकजेति॥ अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्वात्॥ अत उक्तं अपाकजेति॥ अपाकजस्पर्शस्य जलादाव
पि सत्वात् अत उक्तं अनुष्णाशीतेति॥ तेन वायवीयविजातीयस्पर्शो दर्शितः॥ तत्र अनुगतावच्छेदकं वायुत्वं बो
ध्यं॥ तद्घटनवायुः स्पर्शादिलिंगकः॥ वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते विजातीयस्पर्शेन [illegible]शब्देन तृणा

दी०नां धारणेन च वृक्षादीनां कंपेन च तदनुमानात्॥ यथा च॥ वायुर्न प्रत्यक्षः अग्नेर्वक्ष्यते॥ पूर्ववदिति॥ वायुर्द्वि
धो नित्योऽनित्यश्च॥ परमाणुरूपो नित्यः॥ तदन्योऽनित्यः समवेतश्च॥ सोऽपि त्रिविधः॥ शरीरेंद्रियविषयभे
दात् भवत्र शरीरमयोनिजं॥ पिशाचादीनां परं तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टंभादुपभो
गक्षमत्वं॥ जलादीनां प्राधान्याज्जलीयत्वादिकमिति॥ अत्र यो विशेषस्तमाह॥ देहव्यापीति॥ शरीरव्यापकं स्प
र्शग्राहकमिंद्रियं त्वक्॥ तच्च वायवीयं॥ रूपादिषु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात्॥ अंगसंगिसलिलशैत्याभिव्यंजकव्यजन श्रि
वातवत्॥ विषयं दर्शयति प्राणादिरिति॥ यद्यपि वायुश्चतुर्विधः तस्य चतुर्थविधा प्राणादिरुक्तमाकरे न ति
थापि संक्षेपादेव त्रैविध्यमुक्तं प्राणस्त्वेक एव हृदयादिनानास्थानवशान्मुखनिर्गमादिनानाक्रियावशात् प्राणा
पानादिसंज्ञां लभत इति॥ पर्यवसितोऽर्थः॥ आकाशं निरूपयति॥ आकाशस्येति॥ आकाशकालदिशामेकैक
व्यक्तित्वादाकाशत्वादिकं न जातिः॥ किंत्वाकाशत्वं शब्दाश्रयत्वं॥ वैशेषिक इति॥ कथनं तु विशेषगुणानां तास्वव
च्छेदाय ततेन प्रमाणमपि दर्शितं॥ तथा हि॥ शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिंद्रियग्राह्यजातिमत्वात् स्प
र्शवत्॥ शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवत्॥ इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे शब्दो न स्पर्शवद्वि
शेषगुणोऽग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात्॥ सुखवत्॥५५

२

पाकजरूपादावव्यभिचारवारणाय संख्यं तत्परूपादावव्यभिचारवारणाय अकारणगुणपूर्वक इति॥ जलपरमाणुरूपादावव्य
भिचारवारणाय प्रत्यक्षेति॥ नन्विन्द्रियत्वं मनसो गुणः॥ विशेषगुणत्वात् ज्ञानवदित्यात्मविशेषगुणो बहिरिन्द्रियाग्राह्यत्वात्
रूपवत्॥ इत्यनुमानेन [illegible] गगननाम कं सिध्यति॥ न च वायो[illegible]वयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुण अ
पूर्वकं शब्दं सुसघनामिति वाच्यं॥ अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात्॥ तत्र चक्षुरादीरस्य विषयस्य चाभावा
त्॥ इन्द्रियं द्रव्यमिति इन्द्रियमिति॥ नन्वाकाशं लाघवादेकं [illegible] कपमाकाशं स्यात्॥ अत आह॥ इ
न्द्रियं द्रव्यमिति॥ तत्कः संज्ञ पीलादिः आकाश [illegible] श्रोत्रात्मकोभवनीत्यर्थः॥ का
लं निरूपयति॥ जन्यानामिति॥ तत्र प्रमाणं दर्शयितुमाह॥ जगतामिति॥ नपाह॥ इदानीं घटइत्यादिप्रतीतिः॥ सूर्यपरिस्प
न्दादिकं यदि विषयः करोति॥ तदा परिस्पन्दाहीनो घटादेः संबंधो बोध्यः॥ स च संयोगादिर्न संभवतीति कालतत्र संबंधघटकः
कल्पते॥ इत्थं च तस्याश्रयत्वमेव सम्यक्॥ प्रमाणान्तरं वदति॥ परापरत्वेति॥ परात्वादिबुद्धेः साधारणं निमित्तं कालत्वं॥
परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः॥ कल्प्यते इति भावः॥ नन्वेकस्य कालस्य क्ष
णदिनमासवर्षादिसमयभेदेन स्यादत आह॥ क्षणादिरिति॥ कालस्यैकोप्युपाधिभेदात् क्षणादिव्यवहारविषयः॥ उपा
धिस्तु जन्यविभागप्रागभावावच्छिन्नं कर्म॥ पूर्वसंयोगावच्छिन्नविभागो वा॥ पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रा
गभावो वा॥ उत्तरसंयोगावच्छिन्नं कर्म वा॥ न चोत्तरसंयोगेनैव क्षणव्यवहारो न स्यादिति वाच्यं॥ कर्मान्तरसत्वात्॥ ८

मानप्रत्यये सति व्यवहारेऽपि यत्तिन दाअनायासात् एवं सैनैव उपपादनीयं॥ दिशं निरूपयति॥ दूरांतिकेति॥ दूरत्वमिति कृत्वं
चेदं ज्येष्ठं कपरत्वमपरत्वं बोध्यं॥ तद्धेतुरसाधारणबीजं दिगेव॥ दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगा
श्रयतया दिक्सिध्यतीति भावः॥ नन्वेकैव दिग्यदि तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यतामत आह॥ उपाधी
ति॥ यत्पुरुषस्योदयगिरिसंन्निहिता या दिक् तत्पुरुषस्य सा प्राची॥ तद्व्यवहिता प्रतीची॥ एवं तत्पुरुष
स्य सुमेरुसंन्निहिता दिगुदीची॥ तद्व्यवहिता त्ववाची॥ सर्वेषामेव वर्षाणां मेरुरुत्तरस्थितिनियमात्॥ आत्मानं नि
रूपयति आत्मेति॥ आत्मत्वजातिः सुखदुःखादिसमवायिकारणतावच्छेदकतया सिध्यति॥ ईश्वरेपि सा जातिरस्त्येव अदृ
ष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः॥ नित्यस्य सुखस्य रूपयोग्यस्य फलत्वाभावस्वभावनिमहदत्वसाप्रयोजकत्वात्॥
अथवा तु सा जातिर्नास्त्येव प्रमाणाभावात्॥ नन्वेवं दुःखमह... ति॥ ईश्वरत्वेनु विभजनादित्याहुः॥ आदीति॥ अधिष्ठि
ता इंद्रियाणां शरीरस्य च परं परयात्मैव तस्य संपादकः॥ यद्यप्यात्मनि अहं जाने अहं सुखीत्यादि प्रत्यक्षविषयत्वमस्त्ये
व॥ तथापि विप्रतिपन्नं प्रतिप्रथममतत्व शरीरादिभिन्नत्वनीतिगोचर इति प्रतिपादयितुं न शक्यन्त इत्यतः प्रमा
णं दर्शयति॥ कारणं हीति॥ वास्यादीनां छेदादिकारणानां कर्तारमंतरेण ~~नोपपद्यनइत्यतिरिक्तः~~ फलानुसंधानं द
र्शं॥ एवं चक्षुरादीनां अपि फलोपसाधनं कर्तारमंतरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते॥ न तु शरीरस्यैव कर्तृत्वम

स्तन आह ॥ शरीरस्येति ॥ ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां त्वन्मते एव मरणे शरीराणामपि तदभावे का क्षितिः प्रा
णाभावेन ज्ञानाद्यभावस्य संसिद्धेरिति चेन्न ॥ शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुपपत्तेः ॥ शरीरा
णामवयवोपचयेतूत्पादविनाशशालित्वात् ॥ न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पद्यत इति
वाच्यं ॥ अनन्तसंस्कारकल्पनेनैव गौरवप्रसंगात् ॥ एवं शरीरस्य चैतन्ये बालकस्य स्तनपाने प्रवृत्तिर्न स्यात् ॥ इष्ट
साधनताज्ञानस्य तद्धेतुत्वात् ॥ तदानीमिष्टसाधनत्वानुभावकत्वाभावात् ॥ मम मते तु जन्मान्तरानुभूतेष्टसा
धनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः ॥ न च जन्मान्तरीयमनुभूतमन्यदपि स्मर्यतामिति वाच्यं ॥ उद्बोधकाभा
वात् ॥ अत्र त्वनायासा जीवानां अदृष्टमेवोद्बोधकमेव कल्प्यते ॥ इत्थं च संसारस्य अनादितया आत्मनो अनादित्वा
सिद्धावनादिभावस्य नाशासंभवान्नित्यत्वं ॥ संभवतीति बोध्यं ॥ ननु चक्षुरादीनां ज्ञानाश्रयत्वं करणत्वं चा
स्तु विरोधसाधकाभावात् ॥ अत आह ॥ तथात्वं चेदिति ॥ चैतन्यमित्यर्थः ॥ उपघाते नाशे सति अर्थाच्चक्षुरादीनामे
व ॥ कथमिति ॥ पूर्वं चक्षुषा साक्षात्कृतानां चक्षुरभावे स्मृतिर्न स्यात् ॥ अनुभवितुरभावात् ॥ अन्येनानुभूतेऽ
न्यानुस्मरणासंभवात् ॥ अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः ॥ ननु चक्षु

रादीनां चैतन्यं मास्तु ॥ मनसस्तु नित्यं नित्यस्य चैतन्ये स्यादत आह ॥ मनोपीति ॥ न तु ध्यानं चेतनं ॥ ज्ञानादीति मनसो
णुत्वात्प्रत्यक्षे त्वे च महत्त्वस्य हेतुत्वात् ॥ मनसि ज्ञानसुखादिसत्त्वे चित्तत्प्रत्यक्षानुपपत्तेः इत्यर्थः ॥ यद्वाऽणुत्वं मनस
स्तथात्वमेव वक्ष्यते ॥ नन्वस्तु विज्ञानमेवात्मा तस्य तु स्वतः प्रकाशरूपत्वाच्चेतनत्वं ॥ ज्ञानसुखादिकं तु तस्यैवाकारविशेषः
तस्यापि भावत्वादेव क्षणिकत्वं ॥ पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात् ॥ सुषुप्तावपि आलयविज्ञानधा
रा निराबाधैव ॥ मृगमदवासनावासितवसनइव पूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानु
पपत्तिः ॥ स्मरणादेरिति चेन्न ॥ तस्य जगद्विषयत्वे सर्वज्ञापत्तिः ॥ यत्किंचिद्विषयत्वे विनिगमकाभावः ॥ सुषु
प्तावपि विषयावभासापत्तेश्च ॥ तदानीं निराकारश्चेत् संप्रति स्तरनुवर्तते इति चेन्न ॥ तस्याप्रकाशत्वे प्रमाणाभावात्
अन्यथा घटादीनामपि ज्ञानत्वापत्तिः ॥ नन्वेष्टापत्तिः ॥ विज्ञानव्यतिरिक्तवस्तुनोऽस्वीकारादिति वाच्यं ॥ घटादे
रनुभूयमानस्यापलापस्तु अशक्यरूपत्वात् ॥ आकारविशेष एव तत्तद्विज्ञानस्येति चेन्न ॥ किमयमाकारोऽति
रिच्यते विज्ञानात्तर्हि समं ह्यालम्बने नीलाकारोऽपि पीताकारः स्यात् ॥ स्वरूपतो विज्ञानस्याविषयत्वात् ॥ अ
पोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न ॥ नीलत्वानां विरुद्धानामेकस्मिन्नसमावेशात् ॥ इतरस्यावि
शेषाच्च धारणस्यैव दुरुपपादत्वात् ॥ न वा वासनासंक्रमः ॥ संभवति भ्रातृपित्रोरपि वासनासंक्रमप्रसं

न्योणाद्रानोपादेयभावोऽनियामक इति वाच्यं ॥ वासनायाः संक्रमासंभवात् ॥ उत्तरस्मिन्नुत्पत्तिरेव संक्र-
मः इति चेन्न ॥ तदुपादकाभावात् ॥ चिनामेवोत्पादकत्वे नदानेत्यप्रसंगः ॥ क्षणिकज्ञाने तु अतिशयविशेषः
कल्प्यत इति चेन्न ॥ मानाभावात् ॥ कल्पनागौरवाच्च ॥ ततेन क्षणिकशरीरेष्वेव चैतन्यमपि स्यपि प्रसक्तं ॥
गौरवात् ॥ अतिशये मानाभावाच्च ॥ बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः ॥ कुर्वद्रु-
पत्वाकल्पनात् ॥ एतेन क्षणिकविज्ञाने गौरवान्नित्यसविज्ञानमेवात्मा ॥ अविनाशी वारेयमात्मा ॥ सत्य- भा
ज्ञानमनंतं ब्रह्म इत्यादिश्रुतेश्च इति चेन्न ॥ तस्य सविषयत्वासंभवस्य दर्शितत्वात् ॥ निर्विषयस्य ज्ञानत्वे माना-
भावात् ॥ सविषयकत्वस्याप्य[illegible]नुभवात् ॥ अतो ज्ञानभिन्नो नित्य आत्मेति सिद्धं ॥ सत्यं ज्ञानमीति परं ब्रह्मणि ॥ जीवे पु-
नोपयुज्यते ॥ ज्ञानसुखत्वादिभिर्जीवानां भेदसिद्धेः सुतरामीश्वरभेदः अन्यथा बंधमोक्षानुपपत्तेः ॥ योऽपि ईश्वे-
ध रभेदको वेदः सोऽपि तद्भेदेन तदीयत्वं प्रतिपादयन् सौ ॥ अभेदभावनयैव पतितन्वमिति अत एव सर्वत एवात्मनः
ति समर्पिता इति श्रूयते ॥ मोक्षदशायामज्ञाननिवृत्तावपि [illegible] देहजाद्यनङ्गस्यापि न ॥ भेदस्य नित्यत्वेन नाशायोगात्
भेदनाशोऽपि मिथ्यात्वसिद्धयं स्यात् स्यात्सेव ॥ न च द्वित्वमपि न रूपतीति वाच्यं तत्र निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यरूपं त

॥ब्रा०॥
२६॥

दितिचेन्न ॥ द्वित्वाभावेऽपि द्वयात्मकोऽनात्मेति सुवचकत्वान्न ॥ मिथ्यात्वाभावोऽधिकरणात्मकः स तत्र सत्यत्वमि
तिचेन्न तत्कत्वाभावोऽव्याप्ते द्वयात्मको द्वित्वमित्युच्यतां ॥ प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गंधवतीवदु
भयं नैकमिति सत्यस्य सर्वजनग्राह्यत्वान्न ॥ योऽपि तदानीमभेदप्रतिपादक आगमः सोऽपि निर्दुःखत्वादिना
साम्यं प्रतिपादयति ॥ संपदाधिक्येन पुरोहितोऽयं राजा स एवेतिवन्न ॥ अनंतर्वेनिरंजनः परं साम्यमु
पैतीति श्रुतेः ॥ इश्वरोऽपि न ज्ञानसुखात्मा किंतु ज्ञानाद्याश्रयः ॥ नित्यं विज्ञानमानंदं ब्रह्मेत्यादौ वि
ज्ञानपदेन ज्ञानाश्रयत्वोक्तेः ॥ यः सर्वज्ञ इत्याद्युत्तरोधात् ॥ आनंदमित्यस्याप्यानंदवदित्यर्थः ॥ अ
र्श आदित्वान्मत्वर्थीयाच्प्रत्ययात् ॥ अन्यथा पुल्लिंगत्वापत्तेः ॥ आनंदोऽपि दुःखाभाव उपचर्यते ॥ भारोप
पगमे सुखी संवृत्तोऽहमितिवत् ॥ अवाप्तास्मि न्नोदं नंदो न तस्य सावानदः ॥ असुखमिति श्रुतेः ॥ नवि घते सुखं
यस्येति कुतो नार्थ इति चेन्न ॥ क्लिष्टकल्पनापत्तेः ॥ प्रकरणविरोधादानंदमित्यत्र मत्वर्थीयाच्प्रत्ययविरो
धाच्चेति संक्षेपः ॥ तत्तेन ब्रह्मरूतिकार्तिपुरुषः पुष्करपलाशवन्निर्लेपः ॥ किंतु अन्येन नः कार्यकारणयोर
भेदात् कार्यनाशे सत्ति कार्यरूपनयानाशोऽपि स्यादित्यकारणत्वं बुद्धिगनचैतन्याभिमानात्मथानुपपत्त्या

॥वालि॥
॥१६॥

तत्कृपूनं बुद्धिश्च प्रसूतेः परिणामः महत्तत्वमन्तःकरणमित्युच्यते ॥ तत्सत्वासत्वाभ्यां पुरुषस्य संसारापवर्गौ ॥ तस्यात
वेंद्रियप्राणालिकया परिणतिर्ज्ञानरूपा घटादिनासंबंधः पुरुषे कर्तृत्वाभिमानो बुद्धेः ॥ चैतन्याभिमानः अभेदाग्र
हात् ॥ ममेदं कर्तव्यमिति मिदं द्वा पुरुषोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिंबाहत्वात्कोदर्पणस्येव मुखस्योपरागः ॥ इ
दमपि विषयोपरागः इंद्रियप्राणालिकया परिणतिभेदत्वात्त्विकः ॥ निश्वासाभिहतदर्पणस्येव मलिनिमा
कर्तव्यमिति व्यापारादेतौ ॥ तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्विकः ॥ संबंधो दर्पणमलि
मेव मुखस्योपलब्धिरुच्यते ॥ ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव ॥ कृतिसामानाधिकरण्यप्रती न
तेः ॥ नच बुद्धेश्चेतनापरिणामित्वादिति मतमपास्तं ॥ सुखदुःखभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रती
तेः ॥ न भेदे मानाभावाच्च ॥ न चैतनोऽहं करोमीति प्रतीतेः ॥ चैतन्यांशे भ्रम इति चेत् कर्तृत्वांशेऽपि किं नेष्यते अन्यथा बुद्धे
र्नित्यत्वे मोक्षाभावे नित्यत्वेन पूर्ववत्संसारापत्तिः ॥ अचेतनायाः प्रसूतेः कार्यत्वात् बुद्धेरचैतन्यं ॥ कार्यकारणयोस्तादा
त्म्यादिति चेन्न ॥ अस्ति बुद्धेः कार्तुं जन्यत्वे मानाभावात् ॥ बीजशस्त्रा जन्मादृष्टादिदृष्ट्वा ॥ अनादिभावस्य नाशासंभवाच्चि
सत्वं ॥ तत्किं प्रकृत्यादिरूपेण तत्र प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ॥ अहंकारविमूढात्मा कर्ताहमिति मन्य
ते ॥ इत्यनेन विरोध इति वाच्यं ॥ प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः कृतानि मेवैतस्य तद्धर्मत्वात् ॥ तत्रैवं सति
कर्तारमात्मानं केवलं तु यः द्रष्टादिवदतो भगवता प्रकटीकृतोऽयमुभयदिशा द्राष्टाय इति संक्षेपः धर्माधर्मादिति ॥

आत्मेत्यनुषज्यते॥ शरीरस्यात्मत्वे देहांतरकृतकर्मणां देहांतरे भोगानुपपत्तेः॥ विशेषगुणयोगत इति॥ योग्यवि-
शेषगुणस्य ज्ञानस्य सुखादेः संबंधेनात्मनः॥ प्रत्यक्षं भवति॥ नत्वन्यथा॥ अहं जाने अहं करोमीत्यादिप्रतीतेः॥ केव-
लात्मविषयकप्रतीतेरननुभवात्॥ परात्मा तु मीयत इत्यत आह॥ प्रवृत्तीति॥ अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनु-
मीयते॥ प्रवृत्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहभावस्योक्तप्रायत्वात्॥ चेष्टायाः प्रयत्नसाध्यत्वात्॥ चेष्टया प्र-
यत्नवान् परमात्माऽनुमीयते॥ इति भावः॥ तत्र दृष्टांतमाह॥ रथगत्येव सारथिरिति॥ यद्यपि रथकर्म चेष्टा न संभ-
वति॥ तथापि तेन कर्मणा सारथिर्यथानुमीयते तथात्मचेष्टात्मकेन कर्मणा परमात्मापीति भावः॥ अहंकारस्येति॥ अहंका-
रो हमिति प्रत्ययः तस्याश्रयो विषय आत्मा न शरीरादिरिति॥ मनोमात्रस्येति॥ मनोभिन्नेंद्रियजन्यप्रत्यक्षाविषयो मानसप्र-
त्यक्षविषयश्चेत्यर्थः॥ रूपाद्यभावेनेंद्रियांतरायोग्यत्वात्॥ विभुरिति॥ विभुत्वं परममहत्त्वं॥ तच्चापूर्वमुक्तमपि स्पष्टार्थमुक्तं॥ बु-
द्ध्यादीति॥ बुद्धिसुखदुःखादयश्चतुर्दश गुणाः॥ पूर्वमुक्ता एवं वेदितव्याः॥ अथैवं प्रसंगाद्बुद्धेः कतिपयप्रपंचं दर्शयति॥ बु-
द्धिस्त्विति॥ द्वैविध्यमुत्पादयति॥ अनुभूतिरिति॥ अनुभवत्वं स्मरणान्यज्ञानत्वं स्मृतित्वं जातिविशेषः॥ स्मरामीत्यनुव्य-
वसायसिद्धः॥ अनुभवत्वं चानुभवामीत्यनुव्यवसायसिद्धं नातिविशेष इति केचित्॥ चतुर्विधेति॥ तासां चतसृणां कारणा-
नि प्रत्यक्षानुमानोपमानशब्दप्रमाणानीति सूत्रोक्तानि वेदितव्यानि॥ चतुर्विधमुत्पादयति प्रत्यक्षमपीति॥ तत्रेंद्रियजन्यं ज्ञा-
नं प्रत्यक्षं यद्यपि मनोरूपेंद्रियजन्यं सर्वमेव ज्ञानं तथापि इंद्रियत्वेन रूपेणेंद्रियाणां यत्र ज्ञाने कारणत्वं तत्प्रत्यक्षमिति॥

परामर्शजन्यत्वे सति ज्ञानत्वं अनुमितेर्लक्षणं तत्र चेत् परामर्शजन्ये परामर्शविषयकप्रत्यक्षे अतिव्याप्तिः ।। तादृशज्ञत्वे व्याससारत्वार्थहेतुविषयकत्वमिति विशेषणं देयं ।। परामर्शविषय
कप्रत्यक्षे तु विषयकत्वेन हेतुविषयकत्वाभावान्नातिव्याप्तिः ।।

विवादिति नं ।। ईश्वरप्रत्यक्षं तु न लक्ष्यं ।। इदं हि यथार्थसंनिकर्षोत्पन्नमपरे ज्ञानमभिव्यानि व्यवसायात्मकं प्रत्यक्षमिति सूत्रेण ये
केनोक्तत्वात् ।। अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षं ।। अनुमितौ व्याप्तिज्ञानस्योपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञान
स्य स्मरणे अनुभवस्य कारणत्वात् नातिव्याप्तिः ।। इदं लक्षणं ईश्वरप्रत्यक्षसाधारणं ।। परामर्शजन्यं ज्ञानमनुमि
तिः यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्वविषयकं ज्ञानं अनुमितिः ।। ननु केवलं
हेतुविषयकानुमितौ व्याप्तिमिति वाच्यं ।। तादृशज्ञानवृत्ति अनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।। अथवा व्या
प्तिज्ञानकरणकं ज्ञानमनुमितिः ।। एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः ।। पदज्ञानकरणकं शाब्दबोधः ।। वस्तुतो यात्विर्गुत्वे
मिति प्रत्यक्षं मानमपि प्रत्यक्षस्य तत्वित्वे प्रत्यक्षाच्युति जातिमत्त्वमनुमितित्वं ।। तत्वं यत्तित्वेत्प्रत्यक्षादिकमात्रायत्त प्रत्यक्षकिरूप
वृत्तिजातिमत्त्वं प्रत्यक्षादिकं नान्यमिति ।। जन्यप्रत्यक्षं विभजते ।। घ्राणजादीति ।। घ्राणजं रासनं चाक्षुषं ।। स्पार्शनं श्रौत्रं
मानसमिति ।। षड्विधं प्रत्यक्षं ।। न च ईश्वरप्रत्यक्षस्यापि विभाजनान्यूनत्वं ।। जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् ।। उक्त
वृत्तिजातिरपि प्रत्यक्षा ।। गन्धाश्रय ग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यं ।। नपारसद्वति ।। रसत्वादिसहितं इत्यर्थः ।। प्र
त्यक्षं ।। तद्वतीति ।। उद्भूतरूपवतीति ।। योग्येति एतद् रूपत्वादिकमपि योग्यरत्ति बोध्यं तादृशद्वति ।। योग्यव्यक्तिः रासि ।।

॥ ... ०॥

न्चक्षुर्योग्यत्वमेव कथं न दाह ॥ टं त्पन्नानीति आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणं तत्र द्रव्यचाक्षुषं प्रति तयोः
समवायसंबंधेन कारणत्वं ॥ द्रव्यसमवेतप्रत्यक्षे च स्वाश्रयसमवायसंबंधेन ॥ द्रव्यसमवेतसमवेतप्रत्यक्षे स्वाश्रय
समवेतसंबंधेनेति ॥ उद्भूतस्य रूपविशेषत्वं चाक्षुषगोचरं ॥ सोपि उद्भूतस्य रूपोपि स्पर्शो त्यादिसहितः ॥ रूपान्यदिति ॥ रूपभि
न्नरूपत्वादिभिन्नं च चक्षुर्योग्येतरेन्द्रियस्यापि ग्राह्यं ॥ तथा च एकत्वसंख्यादयो चक्षुर्ग्राह्या गुणा उक्ताः ॥ एवं
क्रियात्वं जातयो योग्यवृत्तयः [illegible] चाक्षुषत्वादि ग्राह्या इति ॥ रूपमत्रापि कारणं ॥ द्रव्याध्यक्ष इति ॥ अत्रापि त्वगिन्द्रियजन्ये
पि द्रव्यप्रत्यक्षे रूपं कारणं ॥ तथा च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति ॥ नवीनास्तु बहिरिन्द्रियजन्यद्रव्य
प्रत्यक्षे न रूपं कारणं प्रमाणाभावात् ॥ किंतु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः कारणं ॥ अन्वयव्यतिरेका
त् ॥ बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणं इति चेन्न ॥ किंचित् ॥ अथवा ॥ आत्मा [illegible] उद्भूत [illegible] विशेषगुण
वत्वं वा प्रयोजकमस्तु ॥ रूपस्य कारणत्वे लाघवं इति चेन्न ॥ वायोस्त्वगिन्द्रियेणाग्रहणप्रसंगात् ॥ इष्टापत्ति
रिति चेन्न ॥ उद्भूतस्पर्शत्वलाघवात्कारणमस्तु ॥ प्रभाया अप्रत्यक्षत्वापत्तिरिति चेत् किं न स्यात् ॥ तस्मात् [illegible]
पस्पामीति वक्ष्यति [illegible] प्रत्यक्षत्वे ॥ संभवत्येवं बहिर्द्रव्यप्रत्यक्षमात्रे तु न रूपस्य वा स्पर्श
स्य हेतुत्वं ॥ वायुप्रभयोरेकत्वं [illegible] ॥ [illegible] त्वादिकमपि [illegible] परिमाण [illegible]
त्वचो योग इति ॥ त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः ॥ किं तत्र प्रमाणं सुषुप्तिकाले त्वचं

॥ लि॥
॥१६॥

सत्कादुरितत्रीवर्तमानेन मम साक्षात्कजननमिति ॥ ननु सुषुप्तिकाले किं ज्ञानं भविष्यति ॥ अनुभवरूपं स्मरणरूपं वा ना
द्यः अनुभवसामग्र्या अभावात् ॥ तथा हि ॥ प्रत्यक्षे चक्षुरादीनां सह मनः संयोगस्य हेतुत्वात् ॥ तदभावादेव न चाक्षुष
त्वादिप्रत्यक्षं ॥ ज्ञानादेरभावादेव न मानसप्रत्यक्षं ॥ ज्ञानाभावेपि चात्मनो न प्रत्यक्षमिति ॥ व्याप्तिज्ञानाभावादेव
नानुमितिः ॥ सादृश्यज्ञानाभावादेव नोपमितिः ॥ पदज्ञानाभावान्न शाब्दबोधः इत्यनुभवसामग्र्यभावान्नानुभवः ॥
उद्बोधकाभावान्न स्मरणं ॥ मैवं सुषुप्तिकालोत्पन्ने त्वङ्मनोघ्राणादिव्यक्तेः तु संबंधो नात्मनः ॥ प्रत्यक्षत्वप्रसंगात् ॥ नत्वनीन्द्रियत्वे
ज्ञानाभावात् ॥ अपदज्ञानमात्रे त्वङ्मनः संयोगस्य कारणत्वं न तदा तु सन्ने चाक्षुषप्रत्यक्षादिकालेत्वात्यप्रसक्तं स्यात् ॥ विषुयव
घ्यं योगस्यत्वं त्वङ्मनः संयोगस्य च सत्वात् ॥ परस्परप्रतिबंधादिकमपि न स्यादिति ॥ अत्र केचित् ॥ पूर्वोक्तयुक्त्या त्वङ्मनः संयोग
स्य हेतुत्वसिद्धेश्चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबंधकत्वमनुभवरोधानुकल्पनमिति भावः ॥ अन्ये तु ॥ सुषुप्त्यनुरोधात्त्वङ्मनःसं
योगस्य हेतुत्वं कल्प्यं ॥ चाक्षुषादिप्रत्यक्षे कल्पितत्वं मनःसंयोगाभावान्न त्वक्प्रत्यक्षमिति ॥ मनोग्राह्य इति ॥ मनोजन्यप्रत्यक्ष
विषयत्वमिति सर्वः मतिश्लीनेरू तिर्यत्वः ॥ एवं सुखत्वादिकमपि मनोग्राह्यं ॥ एवं मात्मापि मनोग्राह्यः ॥ किं तु मनोमात्रस्य गोच
रइत्यनेन पूर्वमुक्तत्वादत्र नोक्तः ॥ निर्विकल्पकस्य इति ॥ चक्षुःसंयोगाद्यनंतरं घट इत्याकारकं ॥ घटत्वादिविशिष्टं ज्ञानं न
संभवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात् ॥ विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् ॥ तथा च प्रथमं नोपघ्र

घटत्वेपीवैशिष्ट्यानवगाहि यज्ज्ञानं जायते तेन हेतुना निर्विकल्पकं ॥ तच्च निर्विकल्पकं न प्रत्यक्षं ॥ तथाहि ॥ वैशिष्ट्यानवगाहि ज्ञानं स्वप्र-
सक्षत्वं न संभवति ॥ घटमहं जानामीति प्रत्ययानूत् ॥ न आत्मनि घटज्ञानं प्रकारीभूय भासते ॥ ज्ञाने घटः तत्र घटत्वं ॥ प्रकारीभूतः
सत् वैविशेषणमित्युच्यते ॥ विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते ॥ विशेषणतावच्छेदकं प्रकारकं ज्ञानं विशिष्टवै-
शिष्ट्यावगाहिज्ञाने कारणं ॥ निर्विकल्पे च घटत्वादिकं न प्रकारः ॥ तेन घटत्वादिविशिष्टस्य भाने ज्ञानेन संभवति ॥ घटत्वाप्र-
प्रकारकं घटादिविशिष्टज्ञानं न संभवति ॥ जातिविरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात् ॥ महत्त्वं षड्विधे हेतुरि-
द्रव्यप्रत्यक्षे महत्त्वं समवायसंबंधेन कारणं ॥ द्रव्यसमवेतानां गुणकर्मसामान्यादीनां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन ॥ द्रव्यस-
मवेतसमवेतानां गुणकर्मसामान्यादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति ॥ इन्द्रियमिति ॥ अत्रापि षड्वि-
धहेतुरनुषज्यते ॥ इन्द्रियत्वं तु न जातिः ॥ पृथिवीत्वादिना संकरात् ॥ इन्द्रियत्वं तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानका-
गा रणमनःसंयोगाश्रयत्वं ॥ आत्मादिवारणाय सत्यन्तं ॥ उद्भूतविशेषगुणस्य सत्वात् शब्देतरेति विशेषगुणस्य रूपादेश्चक्षुषि
सत्वात् उद्भूतेति ॥ उद्भूतत्वं तु न जातिः ॥ शुक्लत्वादिना सांकर्यात् ॥ न च शुक्लत्वव्याप्यं नानैवोद्भूतत्वमिति वाच्यं ॥ उद्भूतरू-
पत्वादिना चक्षुषाद्रोजेनकल्पनानुपपत्तेः ॥ किंतु शुक्लत्वादिव्याप्यमुद्भूतत्वं नानाननुद्भावकूटश्चोद्भूतत्वं ॥ तस्य संयो-
गादावपि गतत्वाच्च शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादावपि अस्त्यतो विशेषेति ॥ कालादिवारणाय विशेष्यदलं
इन्द्रियावयवविषयसंयोगस्यापि प्रत्यक्षजनकत्वात् ॥ इन्द्रियावयववारणाय कालादौ रूपाभावप्रसक्तेस्सं

संन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाद्याश्रयस्य कालादेर्वारणाय व्यापारान्तःपदं ॥ विषयेन्द्रि ॥ व्यापारः संन्नि-
कर्षः षड्विधसंनिकर्षमुदाहरणद्वारा दर्शयति ॥ द्रव्यग्रहणमिति ॥ द्रव्यप्रत्यक्षमिन्द्रियसंनिकर्षजन्यं ॥ द्रव्यसमवेतप्रत्यक्षे इं-
द्रियसंयुक्तसमवायजन्यं एवमग्रेपि ॥ वस्तुतस्तु द्रव्यचाक्षुषं चक्षुःसंयोगः कारणं ॥ द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्त-
समवायः ॥ द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः ॥ एवमन्यत्रापि विज्ञेयो व कार्यकारण-
भावः ॥ पृथिवीपरमाणुनीले नीलत्वं पृथिवीपरमाणौ पृथिवीत्वं च चाक्षुषा कुतो न गृह्यते ॥ तत्र परंपरया उद्भूत-
रूपसंबंधस्य महत्वसंबंधस्य च विद्यमानत्वात् ॥ नीलत्वं जातिरेकैक घटनीले परमाणुनीले च वर्तते ॥ तथा [illegible]-
त्वसंबंधो घटनीलमादाय वर्तते रूपसंबंधस्तु उभयमादायैव वर्तते ॥ एवं पृथिवीत्वेपि घटादिकमादाय महत्वसंबंधो
बोध्यः ॥ एवं वायौ तदीयस्पर्शे च चक्षुनाभासा चाक्षुषप्रसंगः स्यात् ॥ तस्मादुद्भूतरूपावच्छिन्नमहत्वावच्छिन्नचक्षुःसंयुक्तसम-
वायस्य द्रव्यसमवेतप्रत्यक्षे तादृशचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतसमवेतप्रत्यक्षे कारणत्वं वाच्यं ॥ इत्थं परमाणुनी-
लादौ न नीलत्वादिपरिग्रहः ॥ परमाणुचक्षुःसंयोगस्य महत्वावच्छिन्नत्वाभावात् ॥ एवं वायौ वायवीयेन स्पर्शादिचाक्षुषं ॥ तत्र चक्षुः-
संयोगस्य रूपावच्छिन्नत्वाभावात् ॥ एवं यत्र घटस्य एकावच्छेदेन आलोकसंयोगः चक्षुःसंयोगस्त्वन्यावच्छेदेन तत्र
घटत्वप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं बोध्यं ॥ एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः

द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः द्रव्यसमवेतसमवेतप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः ॥ अत्रापि
महत्वावच्छिन्नत्वमहत्वस्पर्शावच्छिन्नत्वं पूर्ववदवबोध्यं ॥ एवं गंधप्रत्यक्षे घ्राणसंयुक्तसमवायः ॥ रसप्रत्यक्षे रसनास
युक्तसमवायः ॥ गंधसमवेतस्य घ्राणजप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः ॥ रससमवेतस्य रासनप्रत्यक्षे रसना
संयुक्तसमवेतसमवायः कारणं ॥ शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः ॥ शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नस
मवेतसमवायः ॥ अत्र सर्वं प्रत्यक्षं लौकिकं बोध्यं ॥ वक्ष्यमाणलौकिकं प्रत्यक्षं इंद्रियसंयोगं विनापि भवति ॥ ते च मानस
प्रत्यक्षे मनःसंयोगः ॥ आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः ॥ आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तस
मवेतसमवायः कारणं ॥ अभावप्रत्यक्षे समवायप्रत्यक्षे च इंद्रियसंबंधविशेषणता हेतुः ॥ वैशेषिकमते तु समवायो
न प्रत्यक्षः ॥ यदि स्यादि सादि ॥ अभावप्रत्यक्षे योग्यानुपलब्धिः कारणं ॥ तथाहि ॥ भूतलादौ घटादिज्ञाने घटाभावादि
कं न ज्ञायते ॥ तेनाभावोपलंभे प्रतियोग्युपलंभाभावः ॥ कारणं ॥ तत्र योग्यतापि अपेक्षिता ॥ सा च प्रतियोगिसत्त्वप्र
संजनसंजितप्रतियोगित्वरूपा ॥ तद्यत्र प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसंजितउपलंभरूपः प्रतियोगियस्य
स्यपलंभाभावो अभावप्रत्यक्षे हेतुः ॥ तथाहि ॥ आलोकसंयोगादिकं वर्तते तत्र यदि अत्र घटः स्यात् तर्हि उपलभ्येत इति
आपादयितुं शक्यते तत्र घटाभावा प्रत्यक्षं भवति ॥ अंधकारे तु नापादयितुं शक्यते तेन घ[illegible]भावादेरंधकारे न
॥

चाक्षुषं प्रत्यक्षं स्यादिति न प्रत्यक्षं तु भवती ॥ आलोक संबंधं विनापि स्यादिति न प्रत्यक्षस्यापादयितुं शक्यत्वात् ॥ गुरुत्वादिकं
यद्योग्यं तदभाववस्तु न प्रत्यक्षः ॥ न त्र गुरुत्वादि प्रत्यक्षस्यापादयितुमशक्यत्वात् ॥ वायौ उद्भूत रूपाभाव पाषाणे सौरभाभा
व गुडे तिक्ताभाव वन्हौ अनुष्णत्वाभावः श्रोत्रे शब्दाभावः आत्मनि सुखाभाव तत्तदवमादाय न नेंद्रियैर्गृह्यंते ॥ न त्र न तु प्रत्यक्ष
स्यापादयितुं शक्यत्वात् ॥ संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता ॥ अन्योन्याभाव प्रत्यक्षे अधिकरणयोग्यत्वमपेक्षि
तं अन स्तंभादौ पिशाचादिभेदोपि चाक्षुषा गृह्यत एव ॥ प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधं ॥ तत्र लौकिकप्रत्यक्षे षोढा संनि
कर्षाः ॥ अलौकिकसंनिकर्षाणि इदानीं वदंते ॥ अलौकिक इति ॥ व्यापारः संनिकर्षः ॥ सामान्यलक्षण इति ॥ सामान्यं
न लक्षणं यस्य सः ॥ नत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपं प्रत्यासत्तिरित्यर्थोपलभ्यते ॥ तु अ इंद्रियसंबंध
विशेष्यकज्ञाने प्रकारीभूतं बोध्यं ॥ तथाहि ॥ यत्रेंद्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं तत्र ज्ञाने धूमत्वं प्रकारः
तत्र धूमत्वेन संनिकर्षेण धूमा इत्येवं रूपं सकल धूम विषयकं ज्ञानं जायते ॥ अत्र यदींद्रियसंबंध धूमस्य वोच्यते ॥ तदा धू
लिपटले धूमभ्रमानंतर सकलधूमविषयकं ज्ञानं न स्यात् ॥ तत्र धूमत्वेन सह इंद्रियसंबंधाभावात् ॥ मन्मते
तु इंद्रियसंबंधं धूलिपटलं तद्विषयकं धूम इति ज्ञानं तत्र धूमत्वं प्रकारीभूतं प्रत्यासत्तिः ॥ इंद्रियसंबंधस्य लौकिको

ग्राह्यः ॥ इदं च बहिरिंद्रियस्थले मानसस्थले तु ज्ञानप्रकारीभूतसामान्यं संनिकर्षः ॥ परं तु समानानां भावः सामान्यं न
त्वेकाचिन्निसंधर्मस्यादि ॥ केचित्तु इंद्रियसंघटादि यत्रैको घटः संयोगसंबंधेन भूतले समवायसंबंधेन कपाले वा ज्ञात
स्तदनंतरं सर्वेषां तद्घटवतां भूतलादीनां कपालादीनां च ज्ञानं भवति ॥ तत्रेदं बोध्यं परं तु सामान्यं येन संबंधेन ज्ञा
यते तेन संबंधेन अधिकरणानां प्रत्यासत्तिः ॥ किं तु यत्र घटनाशानंतरं तद्घटवतः स्मरणे जातं तत्र सर्वेषां तद्घट-
वतां भानं न स्यात् ॥ सामान्यस्य तदानीमसत्त्वात् ॥ किं चेंद्रियसंबंधविशिष्टे एकं घटं निययत्र ज्ञानं जातं तत्र परदि
ने इंद्रियसंबंधं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात् ॥ सकलघटविषयकं ज्ञानं कुतो न जायते ॥
तस्मात्सामान्यज्ञानं प्रत्यासत्तिः ॥ ननु सामान्यमिति आह ॥ आसत्तिरित्यादि ॥ प्रत्यासत्तिरित्यर्थः ॥ सामान्यज्ञानमिति
तथा च सामान्यलक्षणेत्यत्र लक्षणशब्दस्य विषयोऽर्थः ॥ तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थोपलभ्यते ॥ ननु
चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादीनां प्रत्यक्षं स्यादत आह ॥ तदिंद्रियजेति ॥ अस्या
र्थः ॥ यदा बहिरिंद्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यद्धर्मिकं किंचिद्धर्मविशिष्टसामान्यस्य तदिंद्रियजन्यज्ञानसा
मग्र्यपेक्षिता ॥ सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकं तेन अंधकारादौ चक्षुरादिना तादृशज्ञानं न जन्यते ॥

ननु ज्ञानलक्षणा प्रत्यासत्तिः ॥ ज्ञानरूपा यदि सामान्यलक्षणं तयोर्भेदो न स्यादत आह ॥ विषयीति ॥ सामान्यज्ञानरू
पा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति ॥ ज्ञानलक्षणा तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति ॥ अत्रार्थः प्रत्यक्षे सं
न्निकर्षं विनाभानं न भवति ॥ तथा च सामान्यलक्षणं विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं
कथं भवतु ॥ तदर्थं सामान्यलक्षणा स्वीक्रियते ॥ न च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यं प्रत्यक्षधूमे वह्नि
संबंधस्य गृहीतत्वादन्यधूमस्य चानुपस्थितत्वात् ॥ धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः ॥ मन्मते तु सामान्यलक्षणया
सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसंदेहः संभवति ॥ न च सामान्यलक्षणास्वीकारेण प्रमे
यत्वेन सकलप्रमेयज्ञाने जाते सर्वज्ञापत्तिरिति वाच्यं ॥ प्रमेयत्वेन सकलज्ञाने जातेऽपि विशिष्य सकलपदार्थानामज्ञात
त्वेन सार्वज्ञ्याभावात् ॥ एवं ज्ञानलक्षणया स्वीकारे सुरभिचंदनमिति ज्ञाने सौरभस्य भानं कथं स्यात् ॥ अत्र यद्य
पि सामान्यलक्षणया सौरभस्य भानं संभवति ॥ तथापि सौरभत्वस्य भानं ज्ञानलक्षणया ॥ एवं धूमत्वेन धूलिपट
लेयत्र ज्ञातं ॥ तत्र धूलिपटलस्य तु व्यवसाये भानं ज्ञानलक्षणया ॥ संयोगज इति ॥ योगाभ्यासजनितो धर्मविशेष
श्रुतिपुराणादिप्रतिपादक ईदृशः ॥ योगिनो द्विविधाः ॥ युक्ता युंजानाश्च ॥ अनयोर्योगजधर्मस्यापि द्वैविध्यं ॥ युक्तस्य त

वद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलयथार्थगोचरं ज्ञानं सर्वस्यैव भवितुमर्हतीति॥ द्वितीयस्य चिन्तावि
शेषोपि सहकारीति॥ इति प्रत्यक्षपरिच्छेदः॥ अनुमितिं व्युत्पादयति॥ मापारास्त्विति॥ अनुमायां अनुमितौ मोर्वतिज्ञानं करणं
परामर्शो व्यापारः॥ तथाहि येन पुरुषेण महानसादौ वह्निव्याप्तिर्गृहीता पश्चात्स एव पुरुषः॥ क्वचित्सर्वतादावनवच्छिन्न
मूलाम् अभ्रंलिहां धूमरेखां पश्यति॥ तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य संभवति॥ पश्चाद्वह्निव्याप्यधू
मवानयं पर्वत इति ज्ञानं भवति॥ स एव परामर्श इत्युच्यते॥ तदनन्तरं पर्वतो यं वह्निमानिति ज्ञानं जायते॥ तदेवानुमितिः॥
अत्र प्राचीनाः वदन्ति॥ व्याप्यस्य ज्ञायमानं धूमादि लिङ्गं करणमिति॥ तद्दूषयति॥ ज्ञायमानमिति॥ लिङ्गस्यानुमितिकार
णत्वे युक्तिमाह॥ अनागतादीति॥ यदि अनुमितौ लिङ्गं करणं स्यात् तदा अनागते न विनष्टेन वा लिङ्गेनानुमितिर्न स्यात्॥ अनुमि
तिकरणस्य लिङ्गस्य तदानीमभावात्॥ व्याप्यस्येति॥ व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहि ज्ञानमनुमितेर्जनकं॥ तत्र
व्याप्यः पक्षेति॥ पक्षो व्याप्यवानिति ज्ञानं वा

अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यमिति ज्ञानाकारिका पक्षो व्याप्यवान् इति ज्ञानात् पक्षो साध्यवानिति वा ॥ द्विविधा इत्यपि परामर्शात् प
क्षः साध्यवानिति वा अनुमितिरित्यन्ये ॥ ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं ॥ विनापि यत्र पर्वतो धूमवानिति प्रसक्ष्ये ॥ ततो धूमो वह्निव्याप्यः इति स्मरण
तत्र ज्ञानद्वयादेवानुमितिदर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं किंतु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वं आवश्यकत्वा
त् ॥ विशिष्टज्ञानकल्पने गौरवाच्चेति चेन्न ॥ व्याप्यतावच्छेदकाज्ञाने वह्निव्याप्यवानिति ज्ञानादनुमित्युपपत्तेः ॥ लाघवाच्च ॥ व्याप्तिप्रकारकपक्षधर्मताज्ञान
त्वेन हेतुता ॥ किंच धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः ॥ व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानस्य सत्त्वात् ॥ न च गृह्यमाणव्या
प्यकतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वं वाच्यं ॥ चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानादनुमित्यापत्तेः ॥ यदि तु तत्पुरुषीयगृह्य
माणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरुच्यते ॥ तदा अनन्तकार्यकारणभावः ॥ मन्मते तु समवा
यसंबंधेन व्याप्तिप्रकारकं पक्षधर्मताज्ञानं च स्वतंत्रं कारणमित्युच्यते ॥ तदा कार्यकारणभावद्वयं ॥ वह्निव्याप्यधूमआलोकवान् पर्वत इति ज्ञा
नादप्यनुमितिः स्यादिति ॥ इदं च यत्र ज्ञानद्वयं न तत्रापि विशिष्टज्ञानं कल्पनीयं ॥ फलं तु सगौरवस्यादिपत्यादिति ॥ ननु व्याप्यो नाम व्याप्त्याश्रयः
तत्र व्याप्तिः ॥ केइ सत आह ॥ व्याप्तिरित्यादि ॥ वह्निमान् धूमादित्यादौ साध्यं वह्निः साध्यवान् महानसादिः ॥ तदन्यो जलह्रदः तद्वृत्तित्वं धूम
स्येति लक्षणसमन्वयः ॥ धूमवान् वह्नेरित्यादौ साध्यवदन्यास्मिन् अयःपिण्डादौ वह्नेः सत्त्वान्नातिव्याप्तिः ॥ अत्र येन संबंधेन साध्यं तेनैव संबंधेन सा
ध्यवान् बोध्यः ॥ अथवा समवायसंबंधेन वह्निमान् ॥ वह्नेरवयवस्तदन्यो महानसादिः ॥ तत्र धूमस्याविद्यमानत्वात् व्याप्तिप्रसंगः ॥ साध्य
वदन्यश्च साध्यवत्तावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः ॥ तेन यत्किंचिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्त्वेपि न
क्षतिः येन संबंधेन हेतुता तेनैव संबंधेन तदन्यावृत्तित्वं बोध्यं तेन वह्निमदन्यास्मिन् धूमावयवे धूमस्य समवायसंबंधेन सत्त्वेपि न क्षतिः

मु॰का॰ ११

११२३॥

हेतुर्धूमः तदधिकरणं पर्वतः तत्र वर्तमानो योऽभावः महानसीयवह्न्यभावः तत्प्रतियोगितावच्छेदकं महानसीयवह्नित्वं तत्प्रतियोगितावच्छेदकं न साध्यतावच्छेदकमिति व्याप्तिः ॥ तादृशानुप

व्याप्तिवारणार्थं साध्यतावच्छेदकं प्रतियोगितानवच्छेदकमितिवाच्यं ॥ हेतुर्धूमः तदधिकरणं पर्वतः तत्र वर्तमानो योऽभावः महानसीयवह्न्यभा

वः तत्प्रतियोगितावच्छेदकं महानसीयवह्नित्वं प्रतियोगितावच्छेदकं शुद्धवह्नित्वं तद्वाच्छिन्नसाध्यसामानाधिकरण्यं धूमे वर्तते लक्षणसमन्वयः

तथापि पर्वते वह्निरस्ति वह्निर्घटो भयं इति प्रतीतिप्रतीतिसाक्षात्पर्वते घटनोभयाभावे प्रतियोगित्वं वर्तते अप्रतियोगित्वं नास्तीति व्याप्तिः

साध्यवदन्यावृत्तित्वं च नित्यावच्छिन्नप्रतियोगिताकाभावः ॥ तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यहृदादिवृत्तित्वाभावेऽपि नातिव्या

प्तिः ॥ अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादावृत्तित्वं नास्ति

तथापि हेतुतावच्छेदकरूपेणावृत्तित्वं वाच्यं प्रकृते च विशिष्टसत्तात्वस्य हेतुतावच्छेदकत्वान्नातिव्याप्तिः ॥ हेतुतावच्छेदकं वृत्तितानवच्छेदकमि

तितु फलितार्थः ॥ ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः किंच सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सा

मान्यादौ हेतुतावच्छेदकसंबंधेन समवायेनास्तित्वाप्रसिद्धत्वादव्याप्तिरत आह अथवेति हेतुमतिनिष्ठो विरहस्य सतथा विरहो अ

भावः तथा च हेत्वधिकरणवृत्तिर्योऽभावः तत्प्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिः ॥ अन्वयद्यपि वह्निमान्

महानसादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेरस्तीत्यव्याप्तिः ॥ न च सामानाधिकरण्यं वह्निधूमयोर्व्या

प्तिरिति वाच्यं तत्तद्वह्न्यभावाभावसत्त्वात् ॥ तत्सत्त्वेऽपि वह्निर्नास्तीति प्रतीतेः ॥ गुणवान् द्रव्यत्वादित्यादावव्याप्तेश्च ॥ तथापि

साध्यतावच्छेदकं प्रतियोगितावच्छेदकमिति वाच्यं ॥ ननु रूपत्वव्याप्यजातिमान् पृथिवीत्वादित्यत्र साध्यतावच्छेदकरूपत्व

व्याप्यजातयश्च तासां च शुक्लत्वादिरूपाणां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति वाच्यं ॥ तत्र परंप

रया रूपत्वव्याप्यजातिमत्त्वस्यैव साध्यतावच्छेदकत्वात् ॥ नहि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्तीति रूपत्वव्याप्य

जातिमान्नास्तीति बुद्ध्यापत्तेः ॥ तथा च रूपत्वव्याप्यजातेरभावप्रतियोगितावच्छेदकत्वेऽपि जातित्वस्य प्रतियोगितावच्छेदकत्वा

भावान्नातिव्याप्तिः ॥ अथवा द्रव्यादौ साध्ये परंपरया द्रव्यत्वादिकमेव साध्यतावच्छेदकं अथवा साध्यादिभेदेन व्याप्तिभे

दात् तादृशस्थले साध्यतावच्छेदकं प्रतियोगितानवच्छेदकमिति नालक्षणघटकमित्यपि वदंति ॥

तादृशव्याप्तिवारणार्थं तत्रोक्तं यदि हेतुर्धूमः तदधिकरणं पर्वतः तत्र वर्तमानो योऽभावः वह्निघटोभयाभावः तत्प्रतियोगितावच्छेदकं वह्निघटोभयत्वं प्रतियोगितानवच्छेदकं शुद्ध

वह्नित्वं तद्वाच्छिन्नसाध्यसामानाधिकरण्यं धूमे वर्तते लक्षणसमन्वयः ॥ हेतुः द्रव्यत्वं तदधिकरणं घटः तत्र वर्तमानो योऽभावः पटत्वविशिष्टगुणसत्ताभावः तत्प्रतियोगित्वं साध्ये वर्त

ते अप्रतियोगित्वं नास्तीति व्याप्तिः ॥ हेतुः द्रव्यत्वं तदधिकरणं घटः तत्र वर्तमानो योऽभावः पटवृत्तिगुणसत्ताभावः तत्प्रतियोगितावच्छेदकं पटवृत्तिगु

णत्वं प्रतियोगितानवच्छेदकं शुद्धगुणत्वं तदवच्छिन्नसाध्यसामानाधिकरण्यं द्रव्यत्वे वर्तते लक्षणसमन्वयः ॥

॥२२॥

हेतुः गुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टसत्तायाः शुद्धसत्तायाः ऐक्यात् हेत्वधिकरणं गुणादिः तत्र वर्तमानो योऽभावः द्रव्यत्वाभावः तद्धिकरणं द्रव्यं सत्त्वं च साध्य


हेतुः गुणकर्मान्यत्वविशिष्टसत्त्वात्त्वविशिष्टसत्तायाः शुद्धसत्तायाः ऐक्यात् हेत्वधिकरणं गुणादिः तत्र वर्त्तमानो योऽभावः द्रव्यत्वाभावः तदधिकरणं द्रव्यं तस्य वृत्तिश्च साध्य
तावच्छेदकं यद्द्रव्यत्वं तत्प्रतियोगितावच्छेदकं जातं प्रतियोगितानवच्छेदकं न जातं इति तत्त्वात् अव्याप्तिः ॥ तद्वारणार्थं हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणं बोध्यं ॥ विशिष्टसत्ताया
शुद्धसत्तायाश्चैक्यात् तथापि विशिष्टसत्तात्वावच्छिन्नविशिष्टसत्तायाः शुद्धसत्तायाश्च भेदात् विशिष्टसत्तात्वावच्छिन्नविशिष्टसत्ताधिकरणं गुणादि न भवति अपि तु द्रव्यमेव तथा च विशिष्ट
सत्ताधिकरणं द्रव्यं तद्वृत्तिर्योऽभावः गुणत्वाभावः तत्प्रतियोगितावच्छेदकं गुणत्वं प्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं द्रव्यत्वं तद्वच्छिन्नसाध्यमानाधिकरण्यं हेतौ वर्त्तते नाव्याप्तिः
हेतुः तत्र वृक्षत्वेन हेत्वधिकरणं तत्र वृक्षः तत्र वर्त्तमानो योऽभावः मूलावच्छेदेन कपिसंयोगाभावः तत्प्रतियोगितावच्छेदकं संयोगत्वं तदेव च साध्यतावच्छेदकं यत्संयोगत्वं प्रतियोगितावच्छेदकं जातं
प्रतियोगितानवच्छेदकं न जातं इति तत्त्वात् अव्याप्तिः ॥ हेतुतावच्छेदकसंबंधेन हेत्वधि हेतुर्धूमः हेत्वधिकरणं धूमावयवाः तत्र वर्त्तमानो योऽभावः वह्न्यभावः तत्प्रतियोगितावच्छेदकं वह्नित्वं
हेत्वधिकरणं च हेतुतावच्छेदकविशिष्टाधिकरणं बोध्यं ॥ तेन द्रव्यगुणकर्मान्यत्वविशिष्टसत्त्वादि साध्ये शुद्धसत्ता
धिकरणगुणादिनिष्ठाभावप्रतियोगित्वेपि द्रव्यत्वस्य नाव्याप्तिः ॥ हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यं ॥ तेन
समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेपि वह्नेर्नाव्याप्तिः ॥ अभावश्च प्रतियोगिव्यधिकरणो बो
ध्यः ॥ तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन तत्र वृक्षे कपिसंयोगाभावप्रतियोगित्वेपि संयोगस्य ना
व्याप्तिः ॥ न च प्रतियोगिव्यधिकरणत्वं प्रतियोग्यनधिकरणवृत्तित्वं तदा तथैव नाव्याप्तिः ॥ प्रतियोगिनः कपिसंयोगस्या
धिकरणे गुणादौ वर्त्तियो अभावः तस्यैव मूलावच्छेदेन सत्वात् ॥ यत्किंचित्प्रतियोग्यधिकरणावृत्तित्वं तदा संयोगी स
त्त्वादित्यादावतिव्याप्तिः ॥ सत्ताधिकरणे गुणादौ यः संयोगाभावः तस्यैव प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यं
हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात् ॥ स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृ
त्त्यभाव इति निष्कर्षः ॥ प्रतियोग्यनधिकरणं च प्रतियोगितावच्छेदकावच्छिन्नाधिकरणं बोध्यं ॥ तेन विशिष्टसत्तावान् जा
तेरित्यादौ जात्यधिकरणे गुणादौ विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेपि न क्षतिः ॥ अत्र साध्यतावच्छेदकसं
बंधेन प्रतियोग्यनधिकरणत्वं बोध्यं ॥ तेन ज्ञानवान् सत्त्वादित्यादौ स्वनाविधिकरणघटादेर्विषयसंबंधेन ज्ञानाधिकर
णत्वेपि न क्षतिः ॥ द्रव्यं च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेनावह्निविरहसत्त्वेपि न क्षतिः ॥ ननु प्रति
वं च साध्यतावच्छेदकं यद्वह्नित्वं तत्प्रतियोगितावच्छेदकं जातं प्रतियोगितानवच्छेदकं न जातं अव्याप्तिः ॥ हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यं ॥ हेतुतावच्छेदकसंबंधः संयोगसंबंधः तत्संबंधेन हेत्व
धिकरणं पर्वतः तत्र वर्त्तमानो योऽभावः घटाभावः प्रतियोगितावच्छेदकं घटत्वं तद्भिन्नं च साध्यतावच्छेदकं तादृशानवच्छेदकं वह्नित्वं तदवच्छिन्नसाध्यसामानाधिकरण्यं धूमे वर्त्तते नाव्याप्तिः ॥
कपिसंयोगाभावस्य प्रतियोग्यधिकरण ॥

न॥
१४॥

प्रतियोगिसमानाधिकरणत्वात्॥ न च यन्निमान्धूमादित्यादौ घटाभावादेः पूर्वदिग्धप्राची

योगितावच्छेदकावच्छिन्नस्य स्वस्य चित् अधिकरणत्वं तत्सामान्यस्यवाय किंचित् प्रतियोगितावच्छेदकावच्छिन्नानधिकरण
त्वं वा विवक्षितं॥ अपि च कपिसंयोगितत्त्वक्षत्वादित्यत्राव्याप्तिः॥ कपिसंयोगाभावस्य हि प्रतियोगितावच्छेदकावच्छिन्नो वृक्षो
रत्निक पिसंयोगो भवति॥ तद्दनधिकरणं वृक्ष इति॥ द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः॥ सर्वस्यैवाभावस्य पूर्व
क्षणवृत्तित्वविशिष्टस्वाभावात्मकं प्रतियोग्यधिकरणसंयुक्तपर्वतादेस्तथापि साध्यतावच्छेदकसंबंधेन तत्प्रतियोग्यनधिकर
णमस्तीवेति॥ कथमिति प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यं॥ घटाभावेनद्रूप्यभावः तस्य घटाभावात्मकतया घटा
भावस्य वह्निरपि प्रतियोगिनद्धिकरणं च पर्वतादिरिति क्रमेण प्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात्॥ यदि घटाभावादे
र्वह्न्यभावादिभिन्नत्वं इष्यते तथापि धूमाभाववत्त्वात्॥ ~~[illegible]~~ वह्न्यभावादित्यत्राव्याप्तिः॥ तत्र साध्यतावच्छेदकसंबं
धः स्वरूपसंबंधः॥ नेत्यच सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं॥ हेत्वधिकरणे सोति
+ रत्नीयेतु कपिसंयोगाभाववत्त्वात् आत्मत्वात् इत्यादाव्याप्तिः॥ तत्रात्मवृत्तिकपिसंयोगाभावाभावः कपिसंयोगस्तस्य गुणता
प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि तदवच्छिन्नानधिकरणत्वं च हेत्वधिकरणस्यात्मन इति मैवं॥ यादृशप्रति
योगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमनस्तादृशं प्रतियोगितानवच्छेदकस्याविवक्षितत्वात्॥ न तु कालो घटवान् का
लपरिमाणादित्यत्र॥ प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः॥ हेत्वधिकरणस्य कालस्य जगदाधारतया सर्वेषामेवाभावानां
साध्यतावच्छेदकसंबंधेन कालिकविशेषणतया प्रतियोग्यधिकरणसत्त्वात्॥ अत्र केचित्॥ महाकालान्यत्वविशिष्टघटाभा

द्यविशिष्टत्वाभावाभावत्



॥बलि॥
॥१४॥

वः सत्र प्रयोगिन्यधिकरणः महाकालस्य घटाधारत्वेपि महाकालान्यत्वाभावविशिष्टघटाधारत्वाभावात् ॥ महाकाले महाकाल
भेदाभावात् ॥ वस्तुतस्तु प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामा
न्यीयसंबंधावच्छिन्नत्वधर्मावच्छिन्नत्वोभयाभावः स्वसंबंधेन स्वधर्मावच्छिन्नत्वस्थानहेतुव्यापकत्वं बोध्यं ॥ व्यापकसामानाधि
करण्यं च व्याप्तिः ॥ यः संबंधः साध्यतावच्छेदकसंबंधः यश्च धर्मः साध्यतावच्छेदकधर्मः तन्मयदियच्च धर्मावच्छिन्नत्वाभावः मात्रमुच्यते ॥
तदा समवायेन योवह्न्यादिरूपभावतस्य प्रतियोगिता वच्छेदकसंबंधेन प्रतियोग्यनधिकरणभूतहेत्वधिकरणवृत्त्यभावप्रतियोगि
तायाय धर्मावच्छिन्नत्वसत्वात् ॥ वह्निमान् धूमादित्यत्राव्याप्तिः ॥ स्यात् ॥ यदि च यत्संबंधाभावमात्रमुच्यते ॥ न तादृशसंयोगेन
घटाभावस्य प्रतियोगितायां संयोगसंबंधावच्छिन्नत्वसत्वात् व्याप्तिः स्यात् ॥ अतस्तु उभयमुपात्तं ॥ धूमवान्वह्नेरित्यादौ अतिव्याप्तिवार
णाय सामान्यमिति ॥ इदं च कालो घटवान् कालपरिमाणादित्यादौ संयोगसंबंधेन घटाभावप्रतियोगितायां घटस्यानधिकरणे महा
काले वर्तमानः स तत्र संयोगेन घटाभावः तत्प्रतियोगितायां कालिकसंबंधावच्छिन्नत्व घटत्वावच्छिन्नत्वोभयाभावसत्वान्ना
व्याप्तिः ॥ ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नप्रतियोगिताकं ॥ गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न ॥ कंबुग्रीवा
दिमान् घट इति प्रतीत्या कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगिताविषयकरणेन गुरुधर्मस्याप्यवच्छेदकत्व स्वीकारादिति संक्षेपः ॥ पक्षवृत्ति
त्वमित्यत्र पक्षत्वं किं तदाह ॥ सिसाधयिषेति ॥ सिसाधयिषाविरहविशिष्टसिद्ध्यभावः ॥ पक्षतातद्वान् पक्ष इत्य
र्थः ॥ सिसाधयिषामात्रं न पक्षता ॥ विनापि सिसाधयिषां घनगर्जितेन मेघानुमानात् ॥ अनतत्व साध्यसंदेहो पि

नपक्षता ।। विनापि संदेहं घनगर्जितेन मेघानुमानात् ।। सिद्धौ सत्यामपि सिसाधयिषासत्वेऽनुमितिर्भवत्येव ।। अ
तः सिसाधयिषाविरहविशिष्टसिद्ध्यभावो विशेषणं ।। तथा च यत्र सिद्धिर्नास्ति तत्र सिसाधयिषायां सत्यामसत्यामपि पक्षता ।।
यत्र सिसाधयिषा अस्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता ।। यत्र तु सिद्धिरस्ति सिसाधयिषा नास्ति तत्र न पक्षता ।। सिसाधयिषावि
रहविशिष्टसिद्धेः सत्वात् ।। ननु यत्र परामर्शानन्तरं विशिष्टसिद्धेः सत्वेन सिसाधयिषा तत्र सिसाधयिकाले परामर्शनाशा
न्नानुमितिः ।। यत्र सिद्धिपरामर्शौ सिसाधयिषा क्रमेण संभवति तत्र सिसाधयिषाकाले सिद्धेर्नाशान्नान ।। प्रतिबंधकाभावा
देवानुमितिः ।। यत्र सिसाधयिषा सिद्धिपरामर्शस्तत्परापरामर्शकाले सिसाधयिषैव नास्ति ।। एवमन्यत्रापि ।। सिद्धिकालप
रामर्शकाले वा न सिसाधयिषा योग्यविभुविशेषगुणानां अयौगपद्यात् तत्कथं ।। सिसाधयिषाविरहविशिष्ट
त्वं सिद्धेर्लक्षणं इति चेन्न ।। यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इति प्रत्यक्षं स्मरणं वा ततः सिसाधयिषा न तत्र पक्ष
ता सपक्षत्वेन विशेषणान् युक्तत्वादिति अत्रेदं बोध्यं यादृशयादृशसिसाधयिषासत्वे सिद्धिसत्वे यल्लिंगकानुमि
तिः तादृशतादृशसिसाधयिषाविरहविशिष्टसिद्ध्यभावस्तल्लिंगकानुमितौ पक्षता ।। तेन परामर्शसत्वे यत्किंचित्
ज्ञानं जायतामितीच्छायामपि नानुमितिः ।। वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षे सत्वे प्रत्यक्षातिरिक्तं
वह्निज्ञानं जायतामितीच्छायां तु भवत्येव तत्र धूमपरामर्श सत्वे आलोकेन वह्निमनुमिनुयामितीच्छायाम
पि नानुमितिः ।। एवं सिसाधयिषाकाले यादृशसिद्धिसत्वे नानुमितिः तादृशसिद्धिरत्र अनुमितौ वि ।।२५।।

।। ।।

शिष्ट्यैव प्रतिबन्धिका वक्तव्या ॥ तेन पर्वतस्तेजस्वी पाषाणमयो वह्निमानित्यादौ तादृशज्ञानसत्त्वेऽपि अनुमितेर्न विरोधः ॥ परं तु पक्षतावच्छेदकसा
मानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेन अनुमितेर्दर्शनात् ॥ पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेन अनुमिते
र्दर्शनात् ॥ पक्षतावच्छेदकावच्छेदेन अनुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सिद्धिरेव प्रतिबन्धिका ॥ पक्षतावच्छेदकसामानाधिकरण्ये
न अनुमितिं प्रति तु सिद्धिमात्रं विरोधि ॥ इदं तु बोध्यं ॥ यत्रायं पुरुषो न वेति संशयानन्तरं पुरुषत्वव्याप्यकरचरणादिमानयमिति ज्ञानं ॥ त
त्रासत्यामनुमित्सायां पुरुषत्वस्य प्रत्यक्षं भवति ॥ न त्वनुमितिः ॥ अतो अनुमित्साविरहविशिष्टप्रत्यक्षसामग्री कामिनीजिज्ञासादिव
त् स्वातन्त्र्येण प्रतिबन्धिका ॥ एवं परामर्शानन्तरं प्रत्यक्षेच्छां विना पक्षादिप्रत्यक्षानुत्पत्तेः ॥ प्रत्यक्षेच्छाविरहविशिष्टानुमिति
सामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिकेति संक्षेपः ॥ हेत्वाभासान्निरूपयति अनैकान्तिक इति ॥ तल्लक्षणं च यद्विषय
कत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वं हेत्वाभासत्वं ॥ तथा हि ॥ व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते
दोषाः ॥ यद्विषयकत्वं च यादृशविशिष्टविषयकत्वं बोध्यं ॥ तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि न क्षतिः ॥ तत्र पर्वतो व
ह्न्यभाववानिति विशिष्टस्याप्रसिद्धत्वात् ॥ न हेतुदोषः ॥ ॥ न च यत्र वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्श
काले वह्निव्याप्यधूमस्याभासत्वं न स्यात् ॥ तत्र वह्न्यभावव्याप्यवान् पक्षः इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यं

द्दशापत्तेः ॥ अनुमयाबाधस्यानित्यत्वदोषापत्तेः ॥ तस्मात्तत्र वन्ह्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले न वह्निव्या
प्यधूमस्य नाभासत्वं ॥ तत्र भ्रमादनुमितिप्रतिबंधमात्रं ॥ हेतुस्तु न दुष्टः ॥ इत्थं च साध्याभाववत्त्वित्यादिकं दोषः ॥ तद्वत्ता
च हेतौ येन केनापि संबंधेनेति न व्याः ॥ परंतु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं ॥ हेत्वाभासत्वं ॥ सत्प्र
तिपक्षादौ विरोधिव्याप्त्यादिकमेव ॥ तथा तद्वत्त्वं हेतौ ज्ञानरूपसंबंधेन ॥ नन्वेवं पर्वतो वह्निमान् धूमादित्यादौ बाधभ्र
मे पक्षे साध्याभावविषयकत्वेन अनुमितिविरोधित्वात् ज्ञानरूपसंबंधेन तद्वत्त्वस्यापि सत्त्वात् सद्धेतोरपि ॥ बाधितत्वाप
त्तिरिति वाच्यं ॥ तत्र ज्ञानस्य संबंधत्वाकल्पनात् ॥ अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात् ॥ तत्र बाधित
त्वाभावादित्याहुः ॥ अनुमितिविरोधित्वं च ॥ अनुमितितत्करणान्यतरविरोधित्वं ॥ तेन व्यभिचारिणि नाव्याप्तिः
दोषज्ञानं च यद्धेतुविषयकं तद्धेतुविषयकं [illegible]तद्धेतुविषयकानुमितौ प्रतिबंधं ॥ कं ॥ तेन तद्धेतौ व्यभिचारज्ञाने
हेत्वंतरेण अनुमितिसत्त्वे ॥ ग्राह्याभावावगाहित्वाद्व्यभिचारज्ञानस्य अनुमितिविरोधित्वाभावेपि न क्षतिरि
तिसंक्षेपः ॥ यादृशसाध्यपक्षहेतौ यावंतो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वं ॥ पंचत्वकथनं तु तत्संभवस्य ला घवा
भिप्रायेण ॥ साधारणाद्यन्यतमत्वमनैकांतिकत्वं साधारणः साध्यवदन्यवृत्तिः येन व्याप्तिज्ञानप्रतिबंधः कि

॥ बलि० ॥

असाधारणः साध्यासमानाधिकरणः ॥ तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते ॥ शब्दो नित्यः शब्दत्वादित्यादौत्य
साधारण्यभ्रमः ॥ अन्ये तु सपक्षावृत्तिरसाधारणः ॥ सपक्षश्च निश्चितसाध्यवान् ॥ इदंच शब्दो नित्यः शब्दत्वादित्यादौ
तदा पक्षे साध्यनिश्चयः तदानासाधारण्यं तत्र हेतौ निश्चयादित्याहुः ॥ अनुपसंहारी च अत्यंताभावाप्रतियोगिसा
ध्यकादिः ॥ अनेन व्यतिरेकव्याप्तिज्ञानप्रतिबंधः क्रियेते ॥ विरुद्धस्तु ॥ साध्यव्यापकीभूताभावप्रतियोगी ॥ अयंच
साध्याभावग्रहसामग्रीत्वेन प्रतिबंधकः ॥ सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः ॥ अत्र हेतुरेवेति विशेषः ॥ सा
ध्याभावसाधकत्वेन साध्यसाधनत्वेनोपन्यस्तः ॥ इदं शक्तिविशेषोपस्थापकाश्च विशेषः ॥ सत्प्रतिपक्षः साध्याभा
वव्याप्यवान् पक्षः ॥ अगृहीताप्रामाण्यकसाध्यव्याप्यवत्वप्रकारोपस्थितिकालीनतदभावव्याप्यवत्वेनोपस्थिति
विषयः स इत्यन्ये ॥ अत्र परस्पराभावव्याप्यज्ञानात् परस्परानुमितिप्रतिबंधः फलं ॥ अत्रैके चितु ॥ यथा घटाभाव
व्याप्यवत्ताज्ञाने पि घटः चक्षुः संयोगे पि सति घटवत्ताज्ञानं जायते ॥ तथा च सत्सपि पीतत्वाभावव्याप्यशंखत्व
वत्ताज्ञाने सति पित्तादिदोषपीतः शंख इति धीरेवं कोटिद्वयव्याप्यदर्शने पि कोटिद्वयस्य प्रसक्तरूपः संशयो भवति ॥
तथा सत्प्रतिपक्षस्थले ॥ संशयरूपानुमितिर्भवति ॥ यत्र चैककोटिव्याप्यदर्शनं तत्राधिकबलतया द्वितीयं

॥मुक्ता०॥
॥१२७॥

कोटिभानप्रतिबंधान्न संशयः॥ फलतांबलेन च अधिकसमबलभावः॥ कल्पतेरसाहुःस्तन्न॥ तर भाव व्याप्यवत्ताज्ञानेसति तदुपनीतभा
नविशेषशाब्दबोधादेरनुदयात्॥ लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्यप्रतिबंधकतालाघवात्॥ नतूपनीतभान
विशेषेशाब्दबोधेचतस्य कूप्रतिबंधकतागौरवात्॥ तथाच प्रतिबंधकसत्वात्कथमनुमितिः॥ नहि लौकिकसंनिकर्षस्थले प्रत्यक्ष
मिवसत्प्रतिपक्षस्थलेसंशयाकारानुमितिः॥ प्रामाणिकी॥ येन अनुमितित्वभिन्नत्वेनापि विशेषणीयं॥ तत्र च कोटिद्वयव्याप्यवत्ता
ज्ञानतत्रोभयमत्रप्रामाण्यज्ञानात्संशयोनान्यथा॥ अग्रहीप्रामाण्यकस्यैवविरोधिज्ञानस्यप्रतिबंधकत्वादिति॥ असिद्धिराश्र
याघ्यन्नतमाश्रयासिद्धिः॥ पक्षेपक्षतावच्छेदकाभावः॥ यत्र च कांचनमयपर्वतोवह्निमानितिसाध्यते॥ तत्र पर्वनमयःइति ज्ञाने
विद्यमानेकांचनमयेपर्वतेपरामर्शप्रतिबंधःफलं॥ स्वरूपासिद्धिस्तु पक्षेव्याप्यत्वाभिमतस्याभावः॥ तत्र ह्रदोद्रव्यं धूमादित्या
दैपक्षेकोटिद्वयस्यप्रत्यक्षरूपःसंशयोभवति॥ तथासत्प्रतिपक्षस्थलेसंशयरूपानुमितिर्भवति॥ यत्रचैककोटिव्याप्यदर्शनं
तत्राधिकबलतयाद्वितीकोटिभानप्रतिबंधान्नसंशयः॥ फलबलेनच अधिकूसमबलभावःकल्पतेरसाहुःस्तन्न॥ तरभव
व्याप्यवत्ताज्ञानेसतितदुपनीतभानविशेषशाब्दबोधेचतत्पक्षसंधकतागौरवात्॥ तथाचप्रतिबंधकसत्वात्कथमनुमि
तिः॥ नहिलौकिकसंनिकर्षस्थलेप्रत्यक्षमिवसत्प्रतिपक्षस्थलेसंशयाकारानुमितिःप्रामाणिकी॥ येन अनुमिति
भिन्नत्वेनापिविशेषणीयं॥ यत्रचकोटिद्वयव्याप्यवत्ताज्ञानंतत्रोभयत्रप्रामाणज्ञानात्संशयोनान्यथा॥ ॥व लि

॥१२७॥

अगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबंधकत्वादिति ॥ असिद्धिश्चाश्रयासिद्ध्याद्यन्यतमा ॥ आश्रयासिद्धिः पक्षे
पक्षतावच्छेदकस्याभावः ॥ यत्र कांचनमयो वह्निमानिति साध्यते ॥ तत्र पर्वते कांचनमयत्वादिज्ञाने विद्यमाने कांचनमये
पर्वते परामर्शप्रतिबंधः फलं ॥ स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः ॥ अत्र ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्य
त्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबंधः फलं ॥ साध्याप्रसिद्ध्यादयस्तु व्या
प्यत्वासिद्धिः ॥ साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः सा तत्र ज्ञाने जाते कांचनमयवह्निमानित्यादौ साध्यतावच्छे
दकविशिष्टसाध्यपरामर्शप्रतिबंधः फलं एवं हेतौ हेतुतावच्छेदकस्याभावः साधनाप्रसिद्धिः ॥ यथा कांचनमयधूमा
दित्यादौ अत्र हेतुतावच्छेदकविशिष्टहेतुज्ञानाभावात् हेतुकव्याप्तिज्ञानादेरभावः फलं ॥ एवं वह्निमान् नीलधूमादित्यादौ
गुरुतया नीलधूमत्वस्य न हेतुतावच्छेदकत्वमपि व्याप्यत्वासिद्धिरित्यपि वदंति ॥ बाधस्तु पक्षे साध्याभावादिः ॥ ध्ध
तस्य फलमनुमितिप्रतिबंधः फलं ॥ तद्धर्मिकतदभावनिश्चययोर्लौकिकसन्निकर्षाजन्यदोषाजन्यतद्धर्मिकतत्ज्ञानमात्रे विरोधीति ॥ ननु संशया
साधारणपक्षे ॥ साध्यसंसृष्टिज्ञानं अनुमितिप्रतिकार्णं ॥ तद्विरोधित्वं बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति चेन्न ॥ अत्र प्रसिद्धसाध्यका
नुमितौ व्यभिचारात् साध्यसंशयादिकं विनाप्यनुमितिसत्त्वेः ॥ एवं साध्याभावादिज्ञाने प्रमात्वज्ञानमपि न प्रतिबंधकं प्रमाणाभावाद्गौ
रवाच्च ॥ अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्यज्ञाने प्रमात्वविषयकत्वेन प्रतिबंधकतापत्तेः ॥ किंतु भ्रमत्वाज्ञानानास्कंदितबाध

।मुक्ता।
।।२६

बुद्धेः प्रतिबंधकता ।। तत्र भ्रमत्वशंकाविघटनेन प्रामाण्यज्ञानं क्वाप्युपयुज्यते ।। न च बाधस्थले पक्षे हेतुसत्वे व्यभिचारः ।। पक्षे हेत्व
भावे स्वरूपासिद्धिरेव दोष इति वाच्यं ।। बाधज्ञानस्य व्यभिचारज्ञानादेर्भेदात् ।। किंच यत्र परामर्शानंतरं बाधबुद्धिः तत्र व्यभिचारज्ञाना
देरकिंचित्करत्वात् बाधस्यानुमितिप्रतिबंधकत्वं ।। वाच्यं ।। तदेवं यत्रोत्पत्तिक्षणावच्छिन्ने घटादौ गंधव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र बाध
स्यैव प्रतिबंधकता वाच्या ।।।। न च पक्षे घटे गंधसत्वात् कथं बाध इति वाच्यं ।। पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादि
ति ।। अन्यथा हेत्वाभासाधिक्यप्रसंगात् ।। बाधव्याप्यसत्प्रतिपक्षो भिन्न एव ।। स्वतंत्रेच्छेन मुनिना प्रपञ्चोपदेशनात् ।। सत्प्रतिपक्षव्याप्यस्तु
न प्रतिबंधक इति ।। यः सपक्षेति ।। सपक्षविपक्षव्यावृत्तिः साधारणः इत्यर्थः ।। सपक्षः साध्यवान् ।। विपक्षः साध्यवद्भिन्नः ।। विरुद्धवारणा
य सपक्षव्यावृत्तित्वमुक्तं ।। वस्तुतो विपक्षव्यावृत्तित्वमेव वाच्यं ।। विरुद्धसाधारणत्वयोर्दूषकताबीजस्याभिन्नतया तस्य पार्थक्यात् ।। यस्तू
भयस्मादिति ।। सपक्षविपक्षव्यावृत्त इत्यर्थः ।। सपक्षः साध्यवत्तया निश्चितः ।। साध्याभावनिश्चयवत्त्वोदिंसादेय साध्याभावनिसत्वस्य संदेहः स
पासंपक्षत्वं ।। घटादीनामेव तत्पारत्वं ।। यत्राद्वत्वमिति ।। तदाव साधारण्यं ।। न व्याप्यभिन्ना ये हेत्वाभासास्ते ह्यापितन्मध्य एवांतर्भवति
यत्र साध्याभाववत्वस्य निश्चयस्तदा नासाधारणः ।। इदं तु प्राचीनमते ।। नवीनमते तु पूर्वमुक्तं ।। केवलान्वयिपक्षक इति ।। केवलान्वयिध
र्मावच्छिन्नपक्षक इत्यर्थः ।।। सर्वमभिधेयं प्रमेयत्वादित्यादि साध्यो सर्वस्यैव पक्षत्वात् ।। सामानाधिकरण्यग्रहस्य तत्रांतराभावान्नानुमितिः ।।

।।न लि
।।२६।

हेतुं न सम्यक् ॥ पक्षैकदेशे सहचारग्रहेऽपि क्षतेरभावात् ॥ असत्त्वात् सहचारग्रहः ॥ तावता व्याप्तिज्ञानरूपा सिद्धिरेव न रेत्याभासत्वं तथापि केवला
न्वयिसाध्यकत्वेन तत्त्वमित्युक्तं ॥ यः साध्यवतीति ॥ तदेवं प्रकारेण साध्यकत्वावच्छिन्नहेत्वभावो बोधितः ॥ तथा च साध्याव्यापकीभूताभावप्रति
योगित्वं तदर्थः ॥ असिद्धिं विभजते ॥ आश्रयासिद्धिरिति ॥ अपरेति ॥ स्वरूपासिद्धिरित्यर्थः ॥ पक्षासिद्धिरिति ॥ आश्रयासिद्धिरित्यर्थः
नीलधूमादिक इति ॥ नीलधूमत्वं गुरुत्वान्न हेतुतावच्छेदकं ॥ स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितत्वेन व्याप्यतावच्छेदक
त्वात् ॥ अभावप्रागभावसंग्रहाय स्वसमानाधिकरणेति ॥ विरुद्धयोरिति कपिसंयोगतदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्र
तिपक्षः ॥ विरुद्धयोरिति ॥ तथा च साध्यविरुद्धसाध्याभाववत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषयत्वमर्थः ॥ सा
ध्यशून्य इति ॥ पक्षतावच्छेदकविशिष्ट इत्यर्थः ॥ तेन घटे गंधसत्त्वेऽपि न क्षतिः ॥ तत्त्वं मूलावच्छिन्नो वृक्षः कपिसंयोगी सत्त्वाबाधं
इति अनुमानपरिच्छेदः ॥ उपमितिं निरूपयति ॥ ग्रामीणस्येति ॥ यत्रारण्यकेनकेनचित् ग्रामीणायोक्तं ॥ गोसदृशो गवयपदवा
च्य इति पश्चात् ग्रामीणेन क्वचिदरण्यादौ दृष्टस्तत्र गोसादृश्यज्ञानं यत्तदुपमितिकरणं तदनन्तरं गोसदृशो गवयपदवा

॥ मुक्ता० ॥
॥२९॥

च्य इत्यतिदेशवाक्यार्थस्मरणं जायते ॥ तदेव व्यापारः ॥ तदनंतरं च गवयो गयपदवाच्य इति ज्ञानं जायते ॥ तदुपमितिः ॥ न त्वयं गवय
पदवाच्य इत्युपमितिः ॥ गवयांतरे शक्तिग्रहाभावप्रसंगात् ॥ इत्युपमितिः ॥ अथ शाब्दबोधप्रकारमाह ॥ पदज्ञानं त्विति ॥ न तु ज्ञाय
मानं पदं करणं ॥ पदाभावेपि मौनीश्लोकादौ शाब्दबोधात् ॥ पदार्थधीरिति ॥ पदजन्यपदार्थस्मरणं व्यापारः ॥ अन्यथा पदज्ञानवतः ॥
प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः ॥ वृत्तिश्च शक्तिलक्षणान्यतरसंबंधः ॥ अत्रैव शक्तिज्ञानस्योपयोगः ॥ पूर्वं शक्तिग्रहाभा
वे हि पदज्ञानेपि तत्संबंधिनः स्मरणानुपपत्तेः ॥ पदज्ञानस्य हि संबंधज्ञानविधया पदार्थस्मारकत्वं ॥ शक्तिश्च पदेन सह पदार्थस्य
संबंधः ॥ सा चास्मात्पदादयमर्थो बोद्धव्य इति ॥ ईश्वरेच्छारूपा ॥ आधुनिके नाम्नि शक्तिरस्त्येव ॥ एकादशेह्नि पिता नाम कुर्यादिति
ईश्वरेच्छायाः सत्वात् ॥ आधुनिकसंकेते तु न शक्तिरिति संप्रदायः ॥ नव्यास्तु ईश्वरेच्छा न तु शक्तिः ॥ किं त्विच्छैव ॥ तेनाधुनिकसंकेतेपि शक्तिरस्ती
त्याहुः ॥ शक्तिग्रहस्तु व्याकरणादितः ॥ शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च ॥ वाक्यस्य शेषाद्विवृतेर्वदंति ॥ सां
निध्यतः सिद्धपदस्य वृद्धाः ॥ धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति ॥ कचित्तु सति बाधके त्यज्यतेपि ॥ यथा वैयाकरणै
राख्यातस्य कर्तरि शक्तिरुच्यते ॥ चैत्रः पचतीत्यादौ कर्त्रा चैत्रस्याभेदेन्वयः ॥ तच्च गौरवात् त्यज्यते किं तु यत्ने शक्तिर्लाघवात् ॥

॥ वति ॥
॥२९॥

इतिश्चैत्रादौ प्रकाशिभ्यपभासते ।। नच कर्तुरनभिधानाच्चैत्रादिपदानंतरं तृतीयास्यादिति वाच्यं ।। कर्तुसंख्याभिधान
स्य तत्र सत्वात् ।। संख्याभिधानयोग्यश्च कर्मत्वाद्युनरधः ।। प्रथमांतपदोपस्थाप्यकर्मत्व इतरविशेषणत्वेन तात्पर्य
विषयत्वमित्सर्थः ।। तेन नचैत्रोऽवगच्छतीत्यादौ नचैत्रस्य संख्यान्वयः यत्र कर्मादौ न विशेषणत्वतात्पर्यं तद्वारणाय प्र
थमांतेति ।। बह्वाधात्वर्थातिरिक्ता विशेषणत्वं भ्रपमदलार्थः तेन नचैत्र इव गच्छतीत्यत्र चैत्रादेर्वारणं ।। लोकं पच
तीत्यादौ लोकादेर्वारणाय द्वितीयदलं ।। तस्य द्वितीयांतोपस्थाप्यत्वाद्वारणं ।। तत्र व्यापारेऽवश्यं केर्गौरवात् ।।
रथो गच्छतीत्यादौ व्यापारे आश्रयत्वेन च लक्षणा ।। जानातीत्यादौ तु ~~विषयत्वं~~ ।। आश्रयत्वेन पश्यतीत्यादौ तु प्रतियोगि
त्वेन निरूढलक्षणा ।। उपमाना यथा शक्तिग्रहस्तथोक्तं ।। तत्र कोशादपि शक्तिग्रहः सति बाधके क्वचित्त्य
ज्यते ।। यथा नीलादिपदानां नीलरूपादौ निलादिविशिष्टे शक्तिः कोशेन समुपास्थिता ।। तथापि लाघवान्नीला
दौ शक्तिर्निलादिविशिष्टे च लक्षणा ।। तव मासवाक्यादपि ।। यथा कोकिलः पिकशब्दवाच्य इत्यादिशब्दात्

पिकादिशब्दे शक्तिग्रहः। एवं व्यवहारादपि शक्तिग्रहः।। यथा प्रयोजकवृद्धेन घटमानयेत्युक्ते तच्छ्रुत्वा प्रयोज्यवृद्धेन
घट आनीतस्तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमित्यवधारयति।। ततश्च घ
टं नय गामानयेत्यादिवाक्यस्थावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति।। इत्थं च भूतले
नीलो घटः इत्यादावन्न शाब्दबोधः घटादिपदानां कार्यान्वितघटादिबोधे सामर्थ्यावधारणात्।। का
र्यनाबोधं प्रति लिङादीनां सामर्थ्याभावान्न शाब्दबोध इति।। केचित्तु।। प्रथमतः कार्यान्वितघ
टादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागोऽचित्यात्।। अत एव चैत्रपुत्रस्ते जातः कन्या ते
गर्भिणीत्यादौ मुखप्रसादमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं नि
र्णयन् हेतुनयातं शाब्दमवधारयेतीति तथा च व्यभिचारान्न कार्यान्विते शक्तिः।। न च तत्र तं प्रत्ये

सादिशक्यातमध्याहार्यं ॥ मानाभावात् ॥ चैत्रपुत्रस्ते जातो मृत इत्येतयोरेतदभावाच्च ॥ इदं च लाघवादन्वितघटे शक्तिं सत्काघट
पदस्य घटमात्रे शक्तिं अवधारयति ॥ तदेवं वाक्यशेषादपि शक्तिग्रहः ॥ यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य शूकविशेषे आर्याणां प्र
योगः कंगौ तु म्लेच्छानां ॥ तत्र क्रियेव पदस्य यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ते ॥ वसन्ते सर्वसस्यानां जायते पत्र
शातनं ॥ मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिन इति ॥ वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते ॥ कंगौ तु शक्तिभ्रमात्प्रयोगः ॥ ना
नाशक्तिकल्पने गौरवाच्च ॥ हरिपदस्तु विनिगमकाभावान्नानाशक्तिकल्पनं ॥ तदेवं विवरणादपि शक्तिग्रहः ॥ विवरणं तत्समानार्थ
कपदान्तरेण तदर्थकथनं ॥ यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणेन घटपदस्य कलशे शक्तिग्रहः ॥ तदेवं पचतीत्यस्य पाकं करो
तीति विवरणादाख्यातस्य यत्नार्थकत्वं कल्पते ॥ तदेवं प्रसिद्धपदसान्निध्यादपि शक्तिग्रहः ॥ यथेह सहकारतरौ मधुरं पिको रौतीत्यादौ
पिकपदस्य कोकिले शक्तिग्रहः ॥ तत्र जातावेव शक्तिर्नतु व्यक्तौ व्यभिचारादानन्त्याच्च ॥ व्यक्तिं विना जातिभानस्यासंभवा
द्व्यक्तेरपि भानमिति केचित् ॥ तन्न शक्तिं विना व्यक्तेर्भानानुपपत्तेः ॥ न च व्यक्तौ लक्षणा ॥ अनुपपत्तिप्रसंधानं प्रतिसंधानं वि
नापि शाब्दबोधात् ॥ न च व्यक्तिशक्तिरूपावानन्त्यं सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात् ॥ नन्वननुगमः गोत्वादेरेवा

॥मु॰॥
॥३१॥

नुगमत्वात्॥ किंच गोशब्दस्येति शक्तिग्रहो यदि तदा व्यक्तौ शक्तिः। यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकयदर्थस्म
रणं शाब्दबोधश्च न स्यात्॥ समानप्रकारकशक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति हेतुत्वात्॥ किंच गोत्वे यदि शक्तिग्रहस्
तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यं॥ गोत्वत्वं तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वं वाच्यं॥ तथा गोव्यक्तीनां शक्यताव
च्छेदकेनुप्रवेशात्तवैव गौरवं॥ तस्मात्तज्जात्यादिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्यादिविशिष्टव्यक्तौ
लक्षणा॥ विश्राम्यतीति॥ शक्तं पदं॥ तच्च क्वचित् यौगिकं॥ क्वचिद्रूढं क्वचिद्योगरूढं क्वचिद्यौगिकरूढं॥ यत्रावयवार्थ एव बुध्य
ते तद्यौगिकं॥ यथा पाचकपदं॥ यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढं॥ यथा गोपदं मण्डपादिपदं॥
यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति॥ तद्योगरूढं॥ यथाहि॥ पंकजादिपदं अवयवशक्त्या पंकजनिकर्तृत्वरूप
मर्थं बोधयति॥ समुदायशक्त्या च पद्मत्वेन पद्मत्वेन रूपेण पद्मं बोधयति॥ न च केवलावयवशक्त्या कुमुदे प्रयोगः स्यादिति वा
च्यं रूढिज्ञानस्य केवलयौगिकार्थस्य बोधे प्रतिबंधकत्वादिति प्राच्यः॥ वस्तुतस्तु समुदायशक्त्युपस्थितपद्मे अवयवार्थपंकज
निकर्तुरन्वयो भवति सान्निध्यात्॥ यत्र रूढ्यर्थबोधः प्रतिबध्यते तत्र लक्षणया कुमुदे बोधः॥ यत्र तु कुमुदत्वेन रूपेण बोधेन॥

॥न्या॰लि॰॥
॥३१॥

तात्पर्यज्ञानं पद्मत्वस्य च बाधः तत्रावयवमात्रेण निर्वाह इत्याहुः ॥ यत्र तु स्थलपद्मादेः अवयवार्थबाधः तत्र स
मुदायशक्त्या पद्मत्वेन रूपेण बोधः ॥ यत्र तु स्थलपद्मे विजातीयपद्मे वनदालक्षणे वा ॥ यत्रावयवार्थरूढ्यर्थयोः स्वातंत्र्येण
बोधः तत्र यौगिकरूढं ॥ यथोद्भिदादिपदं तत्र हि उद्भेदनकर्तारस्तरुगुल्मादयो विबुध्यंते ॥ यागविशेषोपीति ॥ गंगायां घोष इत्यादौ
गंगापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिः ॥ तात्पर्यानुपपत्तिर्वा तत्प्रतिबंधीयनेन लक्षणया तीरस्य बोधः ॥ सा
च शक्यसंबंधः प्रवाहरूपशक्यार्थतीरे गृहीतत्वात् तीरस्य स्मरणं ततः शाब्दबोधः ॥ परं तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्
तदा यष्टीः प्रवेशय इत्यत्र लक्षणा न स्यात् ॥ यष्टिषु प्रवेशनान्वयस्यानुपपत्तेः अभावात् ॥ तेन यष्टिप्रवेशे भोजनतात्पर्यानुपप
त्त्या यष्टिधरे लक्षणा ॥ एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा ॥ सर्वतो दधिरक्षायां तात्पर्यविष
यत्वात् ॥ एवं छत्रिणो गच्छंतीत्यादौ छत्रिपदस्य एकसार्थवाहित्वे लक्षणा ॥ इत्युच्यते ॥ एकसार्थवाहित्वेन रूपेण छत्रीतदन्ययो
बोधः स्यात् ॥ यदि च अन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा क्वचित् गंगापदस्य तीरे क्वचिद्घोषपदस्य मत्स्यादौ लक्षणेति
नियमो न स्यात् ॥ इदं तु बोध्यं शक्यार्थसंबंधो यदि तीरत्वेन रूपेण गृहीतस्तदा तीर[illegible] बोधः ॥

११३२॥

यदि तु गंगातीरत्वेन रूपेण गृहीतः स्यात्तदा तेनैव रूपेण स्मरणं ।। अनतर्भावलक्षणावछेदकेपि लक्षणानन्तरप्र
कारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः ।। परं तु तवं क्रमेण शक्यतावछेदकेपि शक्तिर्न स्यात् ।। तत्तत्प्र
कारकशक्यार्थस्मरणं प्रति तत्तत्पदस्य सामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयं ।। यत्र तु शक्यार्थ
स्य परंपरासंबंधरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते ।। तथा द्विरेफादिरेफद्वयसंबंधो भ्रमरपदे शक्या
यते भ्रमरपदस्य च संबंधो भ्रमरे ज्ञाप्यते ।। तत्र लक्षितलक्षणा । किंतु लाक्षणिकं पदं नानुभावकं ।। ला
क्षणिकार्थस्य शाब्दबोधे तु पदं तत्र कारणं शक्तिलक्षणान्यतरसंबंधेन इतरपदार्थान्वितस्य शक्यार्थ
शाब्दबोधं प्रति पदानां सामर्थ्यावधारणात् ।। वाक्ये तु शक्तेरभावात् शक्यसंबंधरूपा लक्षणापि नास्ति ।। य
त्र तु गभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे लक्षणा गभीरपदार्थस्य नद्या सह अभेदेनान्व
यः कश्चिदेकदेशान्वयस्यापि स्वीकृतत्वात् ।। यदि तत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गभीरतटीलक्षणा

११३२

गभीरपदं तात्पर्यग्राहकं ॥ बहुव्रीहावप्येवं ॥ नत्र हि चित्रगुपदादौ यथैकदेशान्वयः स्वीक्रियते ॥ तदा गोपदस्य गो
मतिलक्षणा ॥ गवि चित्राभेदान्वयः ॥ यदि तु तदेकदेशान्वयो न स्वीक्रियते तदा गोपदस्य चित्रगोमतिलक्षणा ॥ चित्रपदं ता
त्पर्यग्राहकं ॥ तथा आरूढवानरो वृक्षः इत्यत्र वानरपदे वानरारोहणकर्मणि लक्षणा ॥ आरूढपदं तात्पर्यग्राहकं ॥ तत्पुरु
षे तु पूर्वपदे लक्षणा ॥ तथा हि ॥ राजपुरुष इत्यादौ राजपदार्थेन पुरुषादिपदार्थस्य साक्षादन्वयः ॥ निपातातिरि
क्तनामार्थयोर्भेदेनान्वयबाधस्य व्युत्पन्नत्वात् ॥ अन्यथा राजपुरुष इत्यत्रापि तथान्वयबोधः स्यात् ॥ घटो न पट इत्यादौ
घटपटाभ्यां न यां साक्षादेवान्वयात् निपातातिरिक्तेति ॥ नीलघट इत्यादौ नामार्थयोरभेदसंबंधेनान्वयात् ॥ भेदे
नेति ॥ न च राजपुरुष इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यं अस्मृतविभक्तेरपि ततो बोधोदयात् ॥ तस्माद्रा
जपदादौ राजसंबंधिनि लक्षणा ॥ तस्य पुरुषेण सहाभेदान्वयः ॥ द्वंद्वे तु धवखदिरौ छिंधि इत्यादौ धवस्य खदि
रस्य च विभक्त्यर्थपरित्यागे कारणं बुध्यतो न तत्र लक्षणा न च साहित्ये लक्षणेति वाच्यं साहित्यस्य यौरपि द्वंद्व दर्शनात् ॥

११

लक्षणेति न तत्र

नन्वैक क्रियान्वितरूपं साहित्यं समस्तीति वाच्यं साहित्यस्यान्ययोरपि द्वंद्व दर्शनात् ॥ न चैक क्रियान्वितरूपं साहित्यं समस्तीति वाच्यं ॥ क्रियाभेदेपि धवखदिरौ छिं
धि पलाशमित्यादौ तद्दर्शनात् ॥ न चैक क्रियान्वितरूपं साहित्यस्यानुभवात् [illegible] ॥ अत एव राजपुरोहितौ सायुज्यकामौ यजेतामित्यत्र लक्षणाभा
वात् द्वंद्व आश्रीयते ॥ तस्मात् साहित्यादिकं न अर्थः ॥ किंतु वास्तवो भेदो यत्र द्वंद्वः ॥ न च नीलघटयोरभेदः इत्यादौ कथमिति वाच्यं ॥ तत्र नीलपदस्य नील
त्वे घटपदस्य घटत्वे लक्षणा ॥ अभेदः द्वंद्वस्य च आश्रयाभेदः द्वंद्वार्थः ॥ सामाहारद्वंद्वे तु यदि समाहारोप्यनुभूयते इत्युच्यते ॥ तदा अहिनकुलमित्यादौ प
रपदे अहिनकुल समाहारे लक्षणा ॥ पूर्वपदं तात्पर्यग्राहकं ॥ न च अभेदेन्वयं वारयेत्तत्र कथं समाहारस्यान्वयः ॥ तस्यापेक्षाबुद्धि विशेष विषयत्वरूपस्य
बाधेन कर्मत्वासंभवादिति वाच्यं ॥ परंपरासंबंधेन तदन्वयात् ॥ तदंपूर्व पुलीसादावपि ॥ परे तु ॥ अहिनकुलमित्यादौ अहिनकुलत्वं बुध्यते ॥ प्रसे
कमेकत्वान्वयः ॥ समाहारसंज्ञा च ॥ यत्त्वेकत्वनपुंसकत्वं प्राणितूर्यसेनांगानामित्यादौ सूत्रेण ॥ तन्न ॥ अन्यत्रैकवचन समसा [illegible] ॥ पितरौ श्व
शुरौ इत्यादौ पितृपदे न जनकदंपत्योः श्वशुरपदे न स्त्रीजनकदंपत्योर्लक्षणा ॥ एवमन्यत्रापि ॥ घटादौ तु न लक्षणा ॥ घटत्वेन
रूपेण नानाघटोपस्थिति संभवात् ॥ कर्मधारयस्थले तु नीलोत्पलमित्यादौ अभेदसंबंधेन नीलपदार्थ उत्पलपदार्थ प्रका
रस्तत्र च न लक्षणा ॥ अत एव निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषः लक्षणापत्तेः ॥ किंतु कर्मधारयः लक्षणाभावात् ॥

१३२

न च निषादस्य संकरजातीयस्य वेदानधिकारात् याजनासंभव इति वाच्यं ॥ निषादस्य विद्याप्रयुक्तेस्तत्र कल्पनीय
त्वात् ॥ लाघवेन मनुष्यार्थान्वये तु तदनुपपत्तेः कल्पनायाः फलमुखगौरवतयाऽदोषत्वादिति ॥ उपकुम्भं अर्धपिप्पली
त्यादौ परपदे न तत्संबंधिनि लक्षणा पूर्वपदार्थप्रधानतया तत्रान्वयबोध इति ॥ इत्थं समासेन क्वापि शक्तिः ॥ ५
पदशक्त्यैव निर्वाहादिति ॥ आसत्तिरिति ॥ आसत्तिज्ञानं योग्यताज्ञानं आकांक्षाज्ञानं तात्पर्यज्ञानं च शाब्द
बोधे कारणं ॥ तत्रासत्तिपदार्थमाह ॥ सान्निधानं त्विति ॥ अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानं आस
त्तिः ॥ तज्ज्ञानं च शाब्दबोधे कारणं ॥ क्वचिद्व्यवहितेऽप्यव्यवधानभ्रमाच्छाब्दबोध इति चेत् ॥ वस्तुतस्तु व्यवधा
नस्यानपेक्षितत्वात् ॥ यत्पदार्थेन सह यत्पदार्थस्यान्वयोऽपेक्षितः तयोरव्यवधानेनोपस्थितिः शाब्दबो
धे कारणं ॥ तेन गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ अव्यवधानेनोपस्थित्यसंभवान्न शाब्दबोधः ॥ नीलो घटो
द्रव्यं पट इत्यत्रासत्तिसत्त्वे भ्रमाच्छाब्दबोधः ॥ आसत्तिभ्रमेण शाब्दबोधभ्रमाभावेऽपि न क्षतिः ॥ ५५५५५

११

ननु घटश्रीकुंडलीवासस्त्रीदेवदत्तः इत्याद्युक्तेत्वोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशात् व्यवधाने न तत्सदस्मरणासंभ
वः इति चेन्न प्रत्येकपदानुभवजन्यसंस्कारैश्चरमतावद्विषयकस्मरणस्याव्यवधानेनोत्पत्तेः ।। नानासांनिकैर्वैरेकत्र
सक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि संभवात् तावत्सरसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात् ।।७
कथमन्यथा नानावर्णैरेकपदस्मरणं ।। परंतु तावत्पदार्थानां स्मरणादेकदैव खलकपोतन्यायात् तावत्पदार्था
नां क्रियाकर्मभावेनान्वयबोधरूपद्वाक्यबोधो भवतीति केचित् ।। वृद्धा युवानः शिशवः कपोताः खले यथामी युग
पत लंति ।। तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवंती ।।१।। परे तु ।। यत्पदाकांक्षितं योग्यं संनिधा
नं प्रपद्यते । तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ।। तथा च खंडवाक्यार्थबोधानंतरं पदार्थस्य स्मृत्या महावा
क्यार्थबोध इत्याहुः ।। तत्तेन तावद्वर्णाभिव्यंजकपदस्फोटोपि निरस्तः ।। तत्तद्वर्णसंस्कारसहितचरमवर्णोपलं
भेन तत्तद्व्यंजकेनैवोपपत्तेरिति ।। इदं तु बोध्यं ।। यत्र द्वारमित्युक्ते तत्रापि धेहि इत्यादिपदस्याध्याहारादेव तत्र बोधः ।।

p३४।।

नतु पिधानापदाहारात् ॥ पदजन्यपदार्थोपस्थितेः तन्मते तदजन्यशाब्दबोधे कारणत्वात् ॥ किंच क्रियाकर्मपदानां
तेनैव सहाकांक्षत्वात् ॥ तेन क्रियापदं विना कर्मपदं बोधः स्यात् ॥ न पापुष्येभ्य इत्यादौ स्पृहयतीत्यादिपदाध्याहारं
विनान्वयतुर्थ्यनुपपत्तेः ॥ पदाध्याहारो आवश्यकः ॥ योग्यतां निर्वक्ति ॥ पदार्थ इति ॥ तत्क पदार्थेन अपरपदार्थसंबंधो
योग्यतेत्यर्थः ॥ तज्ज्ञानाभावाच्च ॥ वह्निना सिंचतीत्यादौ न शाब्दबोधः ॥ नन्वेतस्याः योग्यतायाः ज्ञानं शाब्दबोधात्मा
नसंभवति ॥ वाक्यार्थस्यापूर्वत्वात् इतिचेन्न ॥ तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्य
योग्यतेत्यर्थः ॥ ताज्ञानस्य संभवात् ॥ नन्वास्तु योग्यताज्ञानं शाब्दबोधे कारणं ॥ वह्निना सिंचतीत्यादौ सेके वह्नि
करणकत्वाभावरूपयोग्यतानिश्चयेन प्रतिबंधान्न शाब्दबोधः ॥ तदभावनिश्चयस्य लौकिकसंनिकर्षाजन्य
दोषाजन्यज्ञानमात्रे प्रतिबंधकत्वात् ॥ शाब्दबोधं प्रत्यपि प्रतिबंधकत्वं सिद्धं ॥ योग्यताज्ञानविलंबाच्च शाब्द
बोधविलंबो असिद्धः इत्याहुः ॥ आकांक्षां निर्वक्ति ॥ यस्य देति ॥ येन पदेन विना यस्य स्यान्वयाननुभावकत्वं
तेन पदेन सह तस्याकांक्षेत्यर्थः ॥ क्रियापदं विना कारकपदं नान्वबोधं जनयति ॥ तेन तस्याकांक्षा ॥

॥३५

वस्तुतस्तु क्रियाकारकपदानां संन्निधानं आससात्त्यारिताख्यं ॥ परंतु घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयारूपाकांक्षाज्ञा
नं कारणं ॥ तेन घटः कर्मत्वं आनयनं कृतिः इत्यादौ न शाब्दबोधः ॥ अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ तु पुत्रेण सह परस्य ता
त्पर्यग्रहसंभावात् ॥ तेनैवान्वयबोधः पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयबोधः स्यादेव ॥ न स्कुरिष्येति ॥ यदि तात्पर्यज्ञानं कारणं न स्या
त् तदा सैंधवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोध इति न स्यात् ॥ न च तात्पर्यग्राहकाणां प्रकरणादीनां शाब्दबोधे कारण
त्वमस्त्विति वाच्यं ॥ तेषामननुगमात् ॥ तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात्कारणमस्तु ॥ ईश्वरीयेऽस्य ले
पताप्रयंज्ञानार्थमीश्वरः कल्प्यते ॥ न चात्राव्यापकता तात्पर्यज्ञानकारणमिति वाच्यं ॥ सर्गादौ अध्यापकाभावात् ॥ न च प्रलये तत्वं ना
स्ति कुतः सर्गादिरिति वाच्यं प्रलयस्यागमप्रतिपाद्यत्वात् ॥ इत्थं च शुकवाक्येपि ईश्वरीयतात्पर्यज्ञानं कारणं ॥ विसंवादिशुकवाक्ये
तु शिक्षयितुरेव तात्पर्यज्ञानं कारणं ॥ अन्ये तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणं ॥ तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्द
बोधः ॥ वेदे त्वध्यात्मिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः ॥ इति शाब्दपरिच्छेदः ॥ पूर्वमेवानुभवस्मरणभेदाद्बुद्धेर्द्वैवि
ध्यमुक्तं ॥ तत्रानुभवप्रकारो दर्शितः सुगमतया स्मरणं न दर्शितं ॥ तत्र हि पूर्वानुभवः कारणं ॥ अत्र केचित् ॥ अनुभवत्वेन न का
रणत्वं किंतु ज्ञानत्वेन अन्यथा स्मरणोत्तरं स्मरणं न स्यात् ॥ समानप्रकारकस्मरणे न पूर्वसंस्कारस्य विनष्टत्वात् ॥ मन्मते तु ॥

॥३५

[OrderDescription]
,CREATED=12.08.20 10:43
,TRANSFERRED=2020/08/12 at 11:05:14
,PAGES=147
,TYPE=STD
,NAME=S0003476
,Book Name=M-2722-KAPNIRA SAKT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF

FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF

FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF

FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF

FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,